अथर्ववेद में सविता देवता को अद्भुत सिद्धियाँ देनेवाला कहा गया है। सविता सूक्ष्मतम अणु, रेणु से लेकर स्थूलकाय तक की प्रेरक शक्ति है। प्रकारान्तर में सविता सावित्री का युग्म प्रस्तुत हुआ। ऋग्वेद में सविता के निवास स्थान तीन द्युलोक हैं। सविता देवता मानव ही नहीं देवों के भी प्रेरक हैं। ब्रह्माण्ड में प्रेरणा का स्थान द्युलोक है। मानवीय पिण्ड में प्रेरणा का स्थान मस्तिष्क है। मस्तिष्क ही समूचे शरीर की गतिविधियों का नियन्त्रण करता है। मस्तिष्क, अनु मस्तिष्क, और सुषुमा शीर्षक। ऋग्वेद में वर्णित तीन द्युलोक– उदन्वती, पीलुमती, प्रद्यौः; तीन लोक–पृथिवी, अन्तरिक्ष, द्युलोक; तीन रोचना– अग्नि, विद्युत्, सूर्य और तीन पृथिवियाँ– अन्नमय, प्राणमय, मनोमय हैं (ऋग्वेद 4.53.5)। ऋग्वेद के अनुसार मनुष्य में सविता देवता से ही कार्य क्षमता है। सविता के प्रति आत्मसमर्पण से सवितृ शक्ति का प्रकटन होता है : "मध्याकर्तोर्न्यधात् शक्मधीरः।(ऋग्वेद 1.35.4)।"

ऋग्वेद से अथर्ववेद में सविता देवता एवं सूर्य देवता अध्यात्मिक, आधिभौतिक, आधिदैविक और भौतिक शक्तियाँ देनेवाले हैं। सविता एवं सूर्य अध्यात्मिक एवं भौतिक ऐश्वर्य, श्री, समृद्धि, हिरण्य, सुख, आरोग्य, वाणिज्य में वृद्धि, ऋणमोचन, मेधा–बुद्धि–शक्तिवर्धन आदि प्रदान करते हैं। ऋग्वेद में सूर्य से "कायाकल्प एवं रोग निवारण की ऋचायें हैं। सूर्य किरणों की भौतिक शक्तियों की भी सूक्ष्मतम व्याख्या वेद में है। ब्राह्मण ग्रन्थों, आरण्यकों, तन्त्र, पुराण और उपनिषद् में वेद के सविता एवं सूर्य को मायावी विस्तार मिला। सविता देवता, अरुण, सूर्य की उपनिषद् में उनके अध्यात्मिक–भौतिक स्वरूप

की व्याख्या की गई है। पंच देवों में सूर्य अथर्वशीर्ष सूर्य देव को परब्रह्म घोषित करता है। सूर्यविद्या सविताविद्या को गूढ़ से गूढ़तम रहस्य रखा गया है। महर्षि अगस्त्य ने महाब्रह्माण्ड में बारह सूर्यों का दर्शन किया। इससे पूर्व वैदिक काल के ऋषि ने आठ सूर्यों की यात्रा की। त्रेतायुग में लंकेश्वर एवं उनके पितामह पुलस्त्य सूर्य विद्या के महान ज्ञाता रहे। इसी काल में महर्षि अगस्त्य लंकेश्वर दशानन रावण और अयोध्यापति महाराजा दशरथ के युवराज श्रीराम के बीच महासमर प्रारम्भ होने से पूर्व उपस्थित हुए। महर्षि अगस्त्य ने श्रीराम को सूर्य की अक्षय ऊर्जा का रहस्य "श्रीआदित्यहृदयम् द्वारा" बताया। आदित्यहृदयम में सूर्य रश्मियों को मंथित कर (सोलर लेजर बीम) लंकेश्वर दशानन रावण के नाभि स्थित अमृतकुण्ड पर छोड़ने की विधि बतायी गई। मूलतः यह स्तोत्र सूर्यविद्या के तिलिस्म के दरवाजे खोलनेवाला है। इसके लिए ऋग्वेद, यजुर्वेद एवं अथर्ववेद के सविता देवता और सूर्य देवता के सूक्तों एवं ऋचाओं का परिशीलन, अनुसन्धान आदि अनिवार्यता है।

वेदकाल में पृथिवी एवं अन्तर ग्रह, अन्तर ब्रह्माण्ड गमन एवं विमानन का उल्लेख मिलता है। भारद्वाज महामुनि ने "यन्त्र सर्वस्व" में अंशुबोधिनी शास्त्र, वैमानिक शास्त्र आदि को भी समाहित किया है। दुर्लभ ग्रन्थ "अंशु बोधिनी शास्त्र" में सूर्य किरण विभाजन और किरण में विद्यमान अनन्त, अखण्ड, अक्षय ऊर्जा आदि के संयोजन का गुह्यज्ञान है। समझा जाता है कि अनेक देशों के रक्षा अनुसन्धानकर्ता अंशबोधिनी शास्त्र के कूटात्मक गुह्यज्ञान को समझने में लगे हैं। वैमानिक शास्त्र के अनुसार ब्रह्माण्ड के दूसरे ग्रहों और दूसरे ब्रह्माण्डों में जानेवाले विमान सौर ऊर्जा से संचालित रहे। महर्षि भरद्वाज ने अंशुबोधिनी शास्त्र में बहुत छोटे–छोटे मन्त्रों में सूर्यविद्या कूटात्मक शैली में लिखी है। प्रकारान्तर में इन मन्त्रों को संस्कृत व्याख्या के साथ प्रस्तुत किया गया है (महामुनि भरद्वाज की कुछ कृत्तियों की पाण्डुलिपि बडौदा विश्वविद्यालय की ओरियेन्टल इन्स्टीटयूट में उपलब्ध है।)।

इसी शृंखला में सूर्यगीता है। यह भारत धर्म महामण्डल और अन्यों ने प्रकाशित की। यह सूर्यगीता सानुवाद साभार प्रस्तुत है। लुप्तप्रायः सूर्य विद्या से सम्बन्धित मूल अरुण संहिता (अप्रकाशित) (स्वर्गीय श्री हवेलीराम जोशी के पास लगभग लाखों पन्नों) की पाण्डुलिपि भी विस्मृति के गर्भ में है। इसी का एक अंश "अरुण स्मृति" पाण्डुलिपि है। यह दुर्लभ पाण्डुलिपि (अरुण स्मृति) डॉ. सर्वेश शर्मा ने संस्कृत में लिपिबद्ध की। अतः संस्कृत की दुर्लभकृति अरुण स्मृति को प्रथम बार सार्वजनिक किया गया है। इसी कड़ी में सूर्य देवता के कुछ दुलर्भ स्तोत्रों को भी विभिन्न स्रोतों से साभार लिया गया है। अट्ठारहवीं


शती में महासिद्ध आचार्य भास्कर राय ने सूर्य से कायाकल्प किया। इसका वर्णन ''तृच भास्कर'' में है। तृच भास्कर साधना एवं उपासना परक है, इसका ध्यान, आवाहन एवं सूर्ययन्त्र बहुत ही अद्भुत एवं चमत्कारिक है। सूर्य के अनुपलब्ध मन्त्र और स्वाहाकार विधि सन्दर्भार्थ दी गई है।

सूर्य चिकित्सा को सविस्तार दिया गया है (वेदाधारित)। सूर्य चिकित्सा वेद से निकलकर सातों द्वीपों में छा गई। प्रकारान्तर में पश्चिम में इसे हिलियोथैरेपी, क्रोमोथैरेपी आदि नाम मिले। सूर्योपासना वैदिक काल के बाद–इंका, माया, मिस्र, रोम, हित्ति, शिन्तो, ताओ, यूनान, ग्रीक, गवल(बायसन), सुमेरिया, असीरिया, बैबीलोन, मिनोअन, पारसी, कस्सी, फैल्डियन, फिनिशियन, यहूदी आदि संस्कृतियों में रच बस गई। वहीं बौद्ध और जैन धर्म में भी सूर्य केन्द्र में रहा। इस महागाथा का रेखाचित्र दिया जा रहा है।

संग्रह ; मौलिक नहीं : सारसंक्षेप में यह ''सूर्य संग्रह'' मात्र है। इसमें वैदिक सविता सूक्त, सूर्य सूक्त, अग्नि सूक्त, अंश बोधिनी शास्त्र, सूर्यगीता, सूर्यशतक, सूर्य मन्त्र, सूर्य स्तोत्र, सूर्य सहस्रनाम आदि विभिन्न ग्रन्थों से साभार लिये गये हैं। उनके अनुवाद और अन्य भी साभार हैं। अरुण स्मृति की पाण्डुलिपि, सूर्ययन्त्र और सविता देवता, सूर्य देवता आदि के चित्र भी साभार हैं। यह वर्षों–वर्षों से विभिन्न पोथियों में उपलब्ध सूर्य देवता पर प्राचीन सनातन ज्ञान की सामग्री का संकलन है। हम सृष्टिविद्या वेद के लुप्त सूर्य विज्ञान की दुलर्भ सामग्री को संग्रह कर प्रस्तुत करने का क्षुद्र प्रयास भर कर रहे हैं।

''तन्मे मनः शिवसंकल्पमस्तु।''





अंशुबोधिनी शास्त्र



सूर्य किरण शक्ति से अंतरिक्ष के ब्रह्माण्डों की यात्रा : वैदिक आर्षग्रन्थ अंशुबोधिनीशास्त्र का अति उन्नत विज्ञान

ऋग्वेदिक कालीन महर्षि भरद्वाज का अंशुबोधिनीशास्त्र सौर्य किरणों की अनन्तशक्ति ऊर्जा से अंतरिक्ष के ब्रह्माण्डों की पलक झपकते यात्रा के अति उन्नत विज्ञान के गुप्त रहस्य से पर्दा उठाता है। सौर्य किरण की शक्ति से अनन्त दूरी पर संदेश भेजना, पल भर में स्थूल शरीर से सूक्ष्म में मिलना और अनेक कार्य सम्पन्न करने की गुप्त दिव्य ब्रह्मविद्या रही। वास्तु साम्यामना में प्राण एवं अपान को एक वस्तु पर केन्द्रित कर सूर्यकिरण ऊर्जा शक्ति को संचालित किया जाता रहा।

अंशुबोधिनीशास्त्र महर्षि भरद्वाज की आध्यात्म और विज्ञान दोनों के ही महासंगम की कूट सूत्रों में लिखी दुर्लभ रचना है। इसे महर्षि भरद्वाज के यन्त्रसर्वस्य का ही भाग माना जाता है। यन्त्रसर्वस्य का ही एक अंश वैमानिक शास्त्र है। ''देश के 35 प्रमुख आर्षरचनाओं प्राचीन पाण्डुलिपियों के खजानों भण्डारों में भरद्वाजकृत यन्त्र सर्वस्य की पाण्डुलिपि उपलब्ध नहीं है। यह शोध गवेषणा का विषय है कि प्राचीन भारत की सर्वोत्कृष्ट वैज्ञानिक कृति यन्त्रसर्वस्य कहां है''? अंशुबोधिनीशास्त्र में किरणशक्ति विभाजनक यन्त्र (यन्त्र प्रकरण), किरणविभाजक मणि, किरणशक्ति मापनयन्त्र आदि का वर्णन है। उनमें निहित कालिमा, प्रकाश, उष्मा, शीतता, शक्ति, गति, पदार्थ, रंग आदि का मापन किया गया। अंशुबोधिनीशास्त्र में विचारशक्ति की गति और वायुवेग का उपयोग पृथिवी, पृथिवीवाले ब्रह्माण्ड और सात सूर्योंवाले ब्रह्माण्डों में आने–जाने के लिए करने का स्तब्ध करने वाला रहस्योद्घाटन मिलता है।

महर्षि व्यास रचित दुर्लभ पाण्डुलिपि ''ब्रह्माण्ड सार'' में ब्रह्माण्डों के रहस्य परत दर परत खोले गए हैं। साथ ही वाल्मीकि गणित में इनकी गणना है। यह अभूतपूर्व है कि ब्रह्माण्ड सार में उनका माप, जीवन आदि के रहस्यलोक से पर्दा उठाया गया है। महर्षि अगस्त्य के ''शक्तितन्त्र'' में 32 प्रकार की विद्युत् ऊर्जा शक्ति का ब्योरा मिलता है। महर्षि आश्वलायन की ''सौदामनि कला रचना'' में पृथिवी लोक से लेकर देवलोक के विभिन्न 22 विषयों को समझाया गया है। महर्षि भरद्वाज ने अंशुबोधिनीशास्त्र के बारे में स्पष्ट किया कि यह अथर्ववेद के सूर्योपनिषद से सम्बन्धित है। सूर्य अथवा

आदि सूर्य सविता के बारे में सवितोपनिषद्, अरुणोपनिषद्, सूर्यतन्त्र, तृचभास्कर, सवितादेवता, सूर्यदेवता, सूर्यगीता, आदित्यहृदयम्, सूर्यरहस्य आदि प्रकाश डालते हें। महर्षि अगस्त्य ने दशरथि राम को लंकेश्वर दशानन रावण के सामने समरांगण में आदित्यहृदयम् में सूर्य की रश्मियों के मंथन का विज्ञान दिया (आधुनिक सोलर लेजर बीम)। भरद्वाज अंशुबोधिनीशास्त्र को श्रुति (वेद) का अंग कहते हैं। श्रुति विलास, प्रपंचलरी (वैज्ञानिक ग्रन्थ), सूर्योपनिषद् में हमारे सौर्यमण्डल अधिष्ठान सूर्य को घोषित किया गया है। शक्ति तन्त्र के अनुसार चैत्यशक्ति के लोहित की भौतिक ऊर्जा को तापना नामकरण दिया गया। प्रत्येक ऊर्जा के ईशत स्पन्द, व्योममुख और चालना चरण माने गए हैं। शक्ति तन्त्र में कूर्म शक्ति, काश्यापी शक्ति, सिम्हका शक्ति, तापना शक्ति, बडबा शक्ति और ओशनिका शक्ति कही गई हैं। सभी दिशाओं के शक्ति केन्द्रों की ऊर्जा का मापन भी चकित करता है। अंशुबोधिनी में अक्षर ब्रह्म के–र, व, स, न, भ, ज, य और श की शक्ति संयोग का रहस्य भी सूत्र में पिरोया है। एकाक्षरनामकोषसंग्रह के अनुसार सूर्य और अग्नि का बीज्ञाक्षर ''र'' है। यहाँ ''व'' वरचूला द्रावका की 6 अम्लीय रसायन शक्ति, 'स' त्रियंक्षा शक्ति में अंधकार के गुण, ''ना'' आकाश की शक्ति, ''भ'' की पांच शक्तियाँ दहनकारी, 'ज' विद्युत् शक्ति, 'य' वायु की सोलह शक्ति और ''क'' सात अम्लों की शक्ति संयोग बताते हैं। प्राचीन काल में दहकती भट्टी (चूल्हे) को कुम्भीनि और कमल से निकली अग्नि को कमलाग्नि नाम से सम्बोधित किया गया। किरण विभाजन यन्त्र के लिए शीशा–दर्पण बनाने में 22 वस्तुओं का वर्णन किया है। इन वस्तुओं की संस्कार विधि भी ''वास्तु संस्कार कल्प'' में सविस्तार लिखा गया है। इनके शुद्धिकरण शोधन की भी पच्चीस प्रक्रियायें करना आवश्यक है। प्रतिबिम्बाकर्षणम् शब्द नये गुप्त लोक में ले जाता है।

हमारे ब्रह्माण्ड को तीन मण्डलों–ब्रह्माण्ड वाहकवत मण्डल, लोक वाहक और सृष्टि वास्तु वाहक में विभाजित किया गया है। नवम् सूत्र में महर्षि भरद्वाज ने अंधकार की आकर्षण शक्ति और सत् शक्ति के महावेग को चिन्हित किया है। शास्त्र में किरण ग्राहक मणि, प्रभाकर मणि, धर्माप्रहका मणि, छायापकार्षण दर्पण, तमोगर्भमणि, छायाप्रभाविभाजक, प्रकाशस्तम्भनचक्र, तमोप्रहरका मणि, भानुफलक आदि की संरचना का विज्ञान सविस्तार लिखा गया है। शास्त्र में मणिशब्द का उपयोग आतशी शीशे या वीक्ष–अंग्रेजी में लेन्स के लिए किया गया है। कालिमा अथवा अंधकार की माप 125 कक्षा (डिग्री) में करने का विधान है। अंशुबोधिनी में रुद्र को सत्, ब्रह्मा को रज और विष्णु को तम् तत्त्व दर्शित किया है। महर्षि मतंग ने एक ही प्रकाश से

गुजरती दो वस्तुओं में एक को प्रकाशमान और दूसरी के कम प्रकाशमान होने के रहस्य को स्पष्ट किया। प्रकाश को भी सवर्ण और निवर्ण में विभाजित किया गया है। सामान्य प्रकाश के भी दो भाग बाह्य प्रकाश और अभ्यान्तर प्रकाश हैं।

आर्ष ग्रन्थ के दर्पण प्रकरण में रंजक दर्पण निर्माण में 23 वस्तुओं के उपयोग का उल्लेख है। अगस्त्य मुनि के शक्ति तन्त्र के व्याप्ति निर्णयाधिकार अध्याय में सजातीय और विजातीय दो प्रकार से सभी संरचना का ब्योरा दिया गया है। बाइसवें सूत्र में शास्त्र के अनुसार विद्युत् जल और उसकी शक्ति के बारे में विवरण है। श्रुति कहती है कि जल रचना से पहले वह विद्युत् के रूप में रहा। आकाश में अप् या आपः (जल) दो धूम्रों या धूम (हाइड्रोजन और आक्सीजन) के रूप में उपस्थित रहा और है। एक धूम्र (हाइड्रोजन) दहनशील है। ''जल ज्योति विलास'' ग्रन्थ में जल के सूक्ष्मतम कण प्रकाश उदक अथवा विद्युत् स्वरूप माना गया है। अव्यक्त ब्रह्म को ज्योतिस्य की संज्ञा दी गई है।

कृष्णमुख दर्पण–शीशे की संरचना 17 पदार्थों से की जाती रही। वैराजिक यन्त्र निर्माण के लिए शिव मुख कुण्ड (भट्टी) प्रयोग में आती थी। ब्रह्माण्ड के नौपथों की नौ शक्तियाँ–घन, आकर्षण, संकोचन, विकासन, प्रसारण, विकल्पन, गर्भकृत, पुष्टि और ज्योति प्रकाशिका हैं। ब्रह्माण्ड जाने के महापथों में तीन प्रकार की शक्तियों से सामना होता है। रोहिणी शक्ति से शेष दो विद्युत् आवेशित शक्तियाँ ठोस आकार लेती हैं। यह भी घोषणा की गई है कि विद्युत् शक्तिमय पथ ही ब्रह्माण्ड के स्थित होने की दिशा बताता है।

वर्तमान श्वेत वराह कल्प के ब्रह्माण्ड के 12 केन्द्र–महापथ केन्द्र मुख, अव्यक्त केन्द्र मुख, कूर्मध्रुव केन्द्र मुख, वरुणीध्रुव केन्द्र मुख, किरण केन्द्र मुख, ज्वाला मुख, वृषनीमुख, वातस्तम्भ मुख, ग्रहमुख, शेषमुख, गज मुख और ध्रुव मुख हैं। महापथ में श्वेत वराहकल्प ब्रह्माण्ड 1606111 वां माना गया है। ब्रह्माण्डों का सृजन अ से क्ष तक अक्षरब्रह्म के नाद से हुआ। ''इन संस्कृत के प्रत्येक अक्षर में 7 करोड़ शक्ति छिपी हुई हैं। इन अक्षरों की शक्तियों के मिलन से ब्रह्माण्ड के ग्रहों की रचना हुई। उनमें स्वर्णिम प्रकाशवान सूर्य भी है। कश्यप में क अक्षर की 8 शक्ति, श अक्षर की 11 शक्ति, य अक्षर की 27 शक्ति और प अक्षर की 4 शक्ति हैं। कश्यप एवं वातरकन्ध के संयोग से अदिति शक्ति उत्पन्न हुई। अदिति शक्ति समस्त सृष्टि रचना का स्रोत है। आकाश को सभी सृजन की स्थली कहा गया है।'' शास्त्र में आकाश की 11 शक्तियाँ, वायु की 13 शक्तियाँ, अग्नि की 8 शक्तियाँ, जल की 10 शक्तियाँ और पृथिवी की 15 शक्तियाँ दर्शित की हैं। यहाँ ''शक्ति शब्द का व्यापक

अर्थ गुण धर्म विशेषतायें हैं।" महर्षि पाराशर के अटूट कौशतुभ में 5 तत्व आकाश, वायु, अग्नि, अंबु–अप्–जल–आपः और भुवन पृथिवी हैं। वहीं श्रुति में 7 सूर्य–अरोग, भ्रज, पतरा, पतंग, सवर्णरा, ज्योतिषमान और विभाषक दिए हैं। "शक्ति पंजर" में दिग्गज, अदिति, कश्यप को प्रकाशमान और कूर्म, शेष, वातस्कन्ध को अन्धकारमय लिखा है। सप्त सूर्यों की किरणें चित्त और चैत्य शक्ति समाहित होती हैं। चित्त शक्ति का अस्तित्व सौर्य किरणों पर निर्भर है। पंच महाभूतों पर निर्भर की जड़ शक्ति का अस्तित्व सौर्य किरणों का निर्भर हैं। पंच महाभूतों पर निर्भर को जड़ शक्ति कहा गया है। आत्म शक्ति का सम्बन्ध चैत्य शक्तियों से है।

अंशुबोधिनीशास्त्र में सौर्य प्रकाश और किरणों की शक्तियों, किरण विभाजन से उत्पन्न अनन्त ऊर्जा–गति–शक्ति और उनको संचालित करनेवाले अति उन्नत यन्त्रों, आतशी शीशे (लेन्स) वीक्ष एवं दर्पणों के निर्माण की विधि को सविस्तार किन्तु कूट शब्दों में वर्णन किया है। यह भी आश्चर्य है कि सौर मण्डल के आकाशी पथों की भौतिक स्थिति का चित्र लिखित विवरण दिया गया है। यह स्मरण रहे कि मूल अंशुबोधिनीशास्त्र कूट सूत्रों में है और श्री बोधानन्दवृत्ति में सूत्रों के गोपनीय रहस्य को एक सीमा तक उजागर करने का जतन किया। सन 1931 में पण्डित टी. सुय्या शास्त्री ने बोधानन्दवृत्ति को अंग्रेजी में अनुवाद किया और फरेदून केशप दादाचन्दजी–रमणिकलाल रतनलाल मोदी ने प्रकाशित करवाया। विश्वभर के वैज्ञानिक अंशुबाधिनी के कूट सूत्रों का रहस्य जानने और अति उन्नत विज्ञान से शस्त्र निर्माण के जतन में हैं। वे ब्रह्माण्ड और मण्डल की पलक झपकते विधि समझने की शोध में वर्षों से लगे हैं। यहाँ तक कि भारतीय रक्षा शोध विकास संगठन के लिए भी अंशुबोधिनी एक पहेली बना है। ।।ऊँ।।





।।अंशु बोधिनी शास्त्र।।



।।शास्त्रोपोद्घातः।।

पुरा खलु भगवान् भारद्वाजः इन्द्रानुग्रह संलब्ध चतुःकल्पायुः तपसाब्रह्माणं संतोष्य प्रत्यक्षीकृत्यच (श्रु) भरद्वाजेत्यामन्त्र्येत्यादि एकैकस्मिन् मुष्ठिनाददे) त्यन्तवाक्यसंदर्भैः श्रुत्युक्तप्रकारेण चतुर्मुख वरप्रसादलब्धं ऋग्यजुस्सामाथर्वात्मकं समष्टिरूपंवेदराशिं, समानीय भूलोकेस्थापयामास। पश्वाद्भगवान् वेदव्यासः तद्वेदराशिं ऋग्वेद, यजुर्वेद, सामवेद, अथर्ववेद प्रभेदेन चतुर्धाविभज्य स्वशिष्यान् पैग्ङल, वैशंपायन, जैमिनि, सुमन्तु प्रभृतीन् ग्राहयामास। एवमेव तच्छिष्य प्रशिष्यादिभिः तदृगादिचतुर्वेदाः शाखाभेदेन विभज्य बहुलीकृताः। पश्चात्सर्वतन्त्रस्वतन्त्राधिकारिणः सर्वशाखाप्रवर्तकाः कश्यप, आंगीरस, भृगु, आश्वलायन, बोधायन, आपस्तंब, याज्ञवल्क्य प्रभृतयोऋषयः तत्तच्छाखाभिप्रायं

संग्रह्यतदनुसारेण स्मृतिपुराणेतिहासधर्मसूत्र; कल्पसूत्राद्यनन्त शास्त्राणि रचयामासुः। तेष्वतीत कल्पसृष्टिक्तममभिवर्ण्य वर्तमान श्वेतवाराह कल्पसृष्टिक्रमोपिप्रतिपादितः। तथैव भगवान् भैरद्वाजोपि (श्रुतिः। सूर्याद्धै खल्विमानि भूतानिजायन्ते त्याद्याथर्वणिक सूर्योपनिषद्वाक्यानूज्ञानदृष्ट्रया सम्यक्संशोध्य सूर्यकिरण स्थित स्थूल, सूक्ष्म, कारण शक्तिभिरेव जगतस्स्थूल, सूक्ष्म, कारणं सृष्टयो भविष्यन्तीति, निश्चित्य तत्र स्थूलकिरणशक्तिभिर्जायमान स्थूलसृष्टिक्रमं मणिदर्पण यंत्रौषधादि स्थूलोपकरणैः तथैव सूक्ष्मकिरणप्रकाशसृष्टिबीज शक्तिभिर्जायमानसूक्ष्मसृष्टिक्रमं योगशास्त्रोक्तसंयमनादि सूक्ष्मोपकरणैः तथा कारण सृष्टिबीजकिरण प्रकाशशक्तिभिः जायमानकारणसृष्टिक्रमं वेदान्तशास्त्रोक्त विचाराद्युपकरणैश्च अनायासेनमन्दमतीनां करतलामलकवत्प्रत्यक्षेणप्रदर्शयितु केवलसूर्यकिरण प्रधान, मंशुबोधिनीशास्त्रं द्वादशाध्याय परिमितं सहस्त्राधिकारैः सूत्ररूपेण रचयामास।।

।।अथ शास्त्रारम्भः।।

।।मंगलाचरण्।

यद्ज्योतिषां ज्योतिरितिप्रचक्षतेयदंशुभिस्सर्वजगत्प्रकाशः।
यद्भासते सर्वहृदिस्वयंप्रभा तवेमभान्तं प्रणतोस्मिनित्यम्।।१।।
यदंशुमथनाद्दिव्यमुदित्यंजातवेदसम्। वहन्तिकेतवोनित्यंतन्नत्वांशुप्रभाकरम्।।
त्रयीहृदयसन्दोह साररूपां सुखावहाम्। कूटस्थविवृंतरूपसृष्टिविज्ञानदायिनीम्।।
यन्त्रतन्त्रोपकरण कार्यनिर्णयबोधिनीम्। सूर्यांशुभेदनात्तच्छक्तिप्रभेदप्रदर्शिनीम्।।
वैदिकींसर्वलोकानां भुक्तिमुक्तिप्रदायिनीम्।
अधिकारस्सहस्त्रैश्चद्वादशाध्यायसंयुताम्।।
वर्णसंकृल्प्तसांकेतसूत्रैस्सम्यग्यथाक्रमम्। सर्वलोकोपकारायप्रवक्ष्याम्यंशुबोधिनीम्।।

।।व्यांख्यान श्लोकाः।।

महादेवंमहादेवीं वाणींगणपतिंगुरुम्। शास्त्रकारं भरद्वाजं प्रणिपत्ययथामति।।
पूर्वाचार्यान्नमस्कृत्यतदग्रन्थानवलोक्यच।
स्वतस्सिद्धन्यायशास्त्रंवाल्मीकिगणितंतथा।।
परिभाषाचन्द्रिकांच तथानामार्थकल्पकम्। समालोड्यविशेषेणतत्प्रमाणानुसारतः।।
सांकेतकरहस्यानु सारेणैवविशेपतः। बालानां सुखबोधांय बोधानन्दयतीश्वरः।।
संग्रहेणांशुबोधिन्याश्श्लोकरूपाद्यथाक्रमम्।
लिलेखबोधानन्दवृत्त्याख्यांव्याख्यांमनोहराम्।।
व्याख्यालक्षणरीत्यास्यपाणिनीयादिमानतः।
पारिभाषिकरूपत्वाद्व्याख्यातुंनैवशक्यते।।

तथाहि।।
श्रुतेर्विरुद्वयच्छास्नं श्रुत्यंगानांतथैवहि।
तच्छास्त्रंदूरतस्त्याज्यंव्याख्यातुंनार्हतिधृवम्।।
पाण्डित्यादर्थलोभाद्वाप्रमादात्साहसाब्दुधः। वेदवेदांगदूरस्यशास्त्रस्यखीयबुद्धितः।।
व्याख्यानां यदिकुर्वीतरौरवंनरकंव्रजेत्। इत्युक्तंप्रवचनाधिकार निर्णयशास्त्रके।।
वेदव्यासेनमुनिनावेदतत्त्वार्थवेदिना। तस्मादारंभितंशास्त्रंनिरर्थकमितीरितम्।।
निरर्थकस्यशास्त्रस्य कथं व्याख्यातुमर्हसि।
इतिचेत्संप्रवक्ष्यामिव्याख्यानार्हत्वकारणम्।।
आरंभितस्यशास्त्रस्यवेदमूलत्वकारणात्। त्रयीहृदयसंदोहसाररूपामितिस्वयमं।।
शास्त्रारंभेसभगवान्भरद्वाजोब्रवीद्यतः। अतोंशुबोधिनीशास्त्रंव्याख्यानार्हत्वतांव्रजेत्।।
अपिच।।
आरंभितस्यशास्त्रस्यकरकल्पादिशास्त्रवत्। आथर्वणिकसूर्योपनिषन्मूलत्ववर्णनात्।।
एतत्सांकेतकमपिशास्त्रंव्रेदप्रमाणतः। भवेद्व्याख्यानार्हकत्वंशिष्टानुग्रहहेतुतः।।
अन्यच्च।।
पाणिनीयादिशास्त्रप्रमाणदूराण्यपिक्रमात्। श्रुतिमूलानिचेत्सांकेतकशास्त्राण्यथा विधि।।
भवन्तिव्याख्यानार्हाणीतिचव्यासेनधीमता। उक्तत्वात्प्रवचनाधिकारेपुनर्यथाक्रमम्।।
शार्स्त्रमानर्थक्यमिति यदुक्तंपूर्वमेवतत्। दूरतोपास्तमेवस्याद्वेदव्यासोक्तितः क्रमात्।।
अतःपूर्वाचार्यमतमनुसृत्ययथाविधि। पूर्वोक्तसांकेतकशास्त्रप्रमाणैरेवकेवलम्।।
सतांमोदायविधिवल्लोकानुग्रहकांक्षया। संग्रहेणांशुबोधिन्याः व्याख्यांनक्रीयतेमया।।
प्रारीप्सितस्यग्रंथस्यनिर्विघ्नेनयथाक्रमम्। परिसमाप्तिप्रचयगमनाभ्यांयथाविधि।।
शिष्टाचारपरिप्राप्तमंगलाचरणस्वतः। अनुष्ठाययथाशास्त्रंशिष्यशिक्षार्थमादरात्।।
यद्ज्योतिषांज्योतिरितीत्यादिश्लोकद्वयेनहि। स्वेष्टदेवनमस्काररूपमंगलमाननोत्।।
अर्थात्सूचयतिग्रन्थेअनुबन्धचतुष्टयम्। अतिगोप्यमिदंशास्त्रवेदस्यहृदयंययतः।।

अध्यायः१ सूत्रम्१

।।अथकल्पसृष्टिरात्मत्वात्सूत्रेण।।

।।बोधानन्द वृत्तिः।।

पराशक्याद्यासदाशिवकल्पान्तयथाक्रम्।
महाकल्पाश्चतुष्षष्टिरितिशास्त्रविनिर्णयः।।१।।
जगत्सृष्टिःक्रमात्तेषुतत्तत्कल्पाधिकारिभिः।
तत्तत्कल्पश्रुतिप्रोक्तरीत्यानानाप्रकारतः।।२।।
अन्नान्नादप्रभेदेनसृज्यतेपूर्वकल्पवत्। एवंहिश्वेतवाराहकल्पश्रुत्यनुसारतः।।३।।

एतत्कल्पाधिपतिनासूर्येणात्मस्वरूपिणा।
श्वेतवाराहकल्पेस्मिन्सृष्टिकर्मसमग्रतः।।४।।
वक्तुकामोभरद्वाजस्सर्वलोकहितेरत। चक्रेंशुबोधिनीनामशास्त्रंलोकोपकारकम्।।५।।
तस्यप्रथमसूत्रार्थस्संग्रहेणनिरूप्यते।
कल्पसृष्टिप्रबोधकपदान्यस्मिन्चतुःक्रमात्।।६।।
पदच्छेदनतस्सम्यङ्निर्णितानियथाविश्वि।
तत्राथशब्दः पूर्वकल्पानन्तर्यार्थबोधकः।।७।।
श्वेतवाराहकल्पस्यसृष्टिमेवयथाक्रमं। द्वितीयपदतःप्रोक्तंतृतीयपदतस्तथा।।८।।
अथर्वेणश्रुतिप्रोक्तात्मत्वंसूर्यस्यदर्शितम्। चर्तुथपदतस्तंत्सूर्येणसृष्टिःप्रदर्शिता।।९।।
पदार्थमेवमुक्त्वास्यसामान्यार्थोधुनोच्यते।।

।।सामान्यार्थः।।

वर्तमानश्वेतवाराहकल्पेस्मिन्यथाक्रमम्।।१०।।
संकल्पमकरोत्स्त्रष्टुंपरमात्मानिरन्जनः।
जगदाकारतस्स्वात्मानमेविवृतक्रमात्।।११।।
तथापिनिर्विकारत्वात्स्वशक्त्योपाधिमन्तरा।
नशशाकजगत्सृष्टिंस्वयंकर्तुमतःक्रमात्।।१२।।
स्वशक्त्यैकांशतस्त्रयीमंडलोपाधिमद्भुतम्।
अकल्पत्सृष्टिबीजमयमत्यन्तभास्वरम्।।१३।।
पुनस्त्रक्तवैकांशेनादित्यमत्यन्ततापदम्। निर्मायतन्मण्डलेयसंदधेपरमेश्वरः।।१४।।
तदादित्यांतरेपश्चात्सएवजगदीश्वरः।
प्रविशत्सूर्यरूपेणसृष्ट्यर्थजगतःक्रमात्।।१५।।
पश्चाच्छिरःपाण्याद्यंगैर्युक्तोमूर्तित्वमापसः। हिरण्यगर्भइत्याहतमेवहिसनातनी।।१६।।
ब्रह्मेतिविश्वसुद्धितिप्रजापतिरितिक्रमात्।
वेदशास्त्रपुराणेतिहासादिषुविशेषतः।।१७।।
एतद्धिरण्यगर्मात्मानमेवाहुर्महर्षयः। कल्पाधिपतिनांमध्येएषएवदिवाकरः।।१८।।
श्वेतवाराहकल्पाधिपतिरित्याहुरास्तिकाः।
सूर्यआत्मेत्यतःप्राहश्रुतिस्साक्षात्सनातनी।।१९।।
वायकल्पानन्तरितश्वेतवाराहकल्पके।
तस्मात्सृष्टिरभूत्सूर्येणात्मत्वाद्विवृतत्वतः।।२०।।
इतिप्रथमसूत्रार्थस्संग्रहेणनिरूपितः। एवंसामान्यार्थमुक्त्वाविशेषार्थोधुनोच्यते।।२१।।

।।विशेषार्थः।।

ननुसृष्ट्यधिकारत्वंनिर्विकारपरात्मनः।
षट्शक्तिमयहेतुत्वाच्छास्त्रेषूक्तंमहर्षिभिः।।२२।।

सूर्याचन्द्रमसौधातायथापूर्वमकल्पयत् ।इत्यादिश्रुतिवाक्येभ्यःकल्पितत्वंरवेस्मृतम् ।२।
कल्पितस्यास्यषट्शक्तित्वमतोमैवविद्यते।

षट्शक्तिरूपमुक्तं सृष्टिबिलासे।।

अधिष्ठानत्वमात्मत्वमुपादानत्वमेवच ।।२४।।
निमित्तत्वंविवृतत्वंनिरुपाधित्वमेवच।
यस्यास्तिसततंएताश्शक्तयष्षट्खभावतः।।२५।।
तस्यैवसृष्टिकर्तृत्वाधिकारंत्वंप्रकीर्तितम्।।
।।इत्यादि।।
तस्मात्सृष्ट्यधिकारत्वंकथन्नुघटतेरवेः ।।२६।।
अतस्सूत्रेजगत्सृष्टिस्सूर्येणेतियदीरितम्।
तदसिंद्धभवेत्तस्तमादेतच्छास्त्रंनिरर्थकम्।।२७।।
निरुपाधिकोवासोपाधिकोवात्मामहेश्वरः।
नित्यत्वादेकरुपत्वादखंडत्वान्निरंतरम्।।२८।।
तस्यसृष्ट्यधिकारत्वंषट्शक्तित्वंतथैवच।
अधिष्ठानत्वमात्मत्वंवर्तत्येवेतिहिस्फुटम्।।२९।।
द्वितीयसूत्रतश्शास्त्रेसर्वमेतद्यथाक्रमम्।
विशदीक्रियतेसम्यक्श्रृतिवाक्यप्रमाणतः।।३०।।
अतएवस्वतस्साक्षात्क्रमादाधर्वणश्रुतिः।
सूर्यआत्माजगत्स्तस्थुषश्चेत्यादिभिस्तथा।।३१।।
सूर्याद्वैखल्विमानीत्यादिवाक्यैश्चयथाक्रमम्।
सूर्यस्यसृष्टिकर्तृत्वमात्मत्वंचस्वभावतः।।३२।।
प्राहतस्माज्जगत्सृष्टिश्श्चेतवाराहकल्पके।
श्रुत्युक्तिमनुसृत्यैवसूर्येणेतिप्रकीर्तितम्।।३३।।
अतस्त्वदुक्तासिद्धत्वंशास्त्रानर्थक्यमेवच।
दूरतोपास्तमेवस्यात्तस्मात्सिद्धान्तमीरितम्।।३४।।

अध्याय १, सूत्रम्

अत्मसिद्धिरधिष्ठाना त्तत्पंचदशन्यायेन

।।बोधानन्द वृत्तिः।।

पदानित्रीणिसूत्रेस्मिन्नात्मसंसिद्धिनिर्णये। तत्रादिमपदेनात्मनिर्णयस्संप्रकीर्तितः।।
अधिष्ठानस्वभावत्वंद्धितीयपदतस्स्मृतम। स्वतस्सिद्धप्रमाणत्वंतृतींयपपतस्तथा।।
एवंपदत्रयैस्सम्यक्सूत्रेस्मिन्सप्रमाणतः। उक्तंस्यादात्मसंसिद्धस्सुविचार्ययथाविधि।।
तत्रादावात्मविषय विचारस्सप्रकीर्त्यते। एकमेवेत्यदिवाक्यैरात्मावेत्यादिभिस्तथा।।

सूर्य आत्मेतिजाकाशआत्मेत्याद्यैरनेकधा। अत्माप्रभेदं श्रुतयेबहुधासंगिरन्तिहि।।
आत्मसंसिद्धिरेतेषु श्रुतिर्लोकहितैषिणी। एकस्यैवात्मनोबूतेउतानेकात्मनामिति।।
संशयेसमनुप्राप्तेसिद्धान्तस्संप्रचक्षते। सत्यज्ञानानन्तरूपः परमात्मानिरन्जनः।।
सृष्ट्यादावेकएवासीन्नान्यत्किंचिन्मनागपि।
सएवात्मा स्वमायोपाधिमंगीकृत्यहिस्वयम्।।
गुणमूर्त्यादिभेदेनानेकात्मत्वमवापहि। उपाधिग्रहणात्पूर्वमखंडैकरसात्मनः।।
आत्मसिद्धिस्स्वतस्सिद्धेत्याहसाक्षात्सनातनी।
उपाधिग्रहणदूर्ध्वं सएवात्मानिरंशकः।।
विवृतत्वंसमासाद्यस्वस्मिन्नेवस्वयंक्रमात्। अनेकात्मत्ववद्भातिभ्रान्तिमात्रात्स्वतोनहि।।
तत्सृष्ट्वातदेवानुप्राविशदित्यादिवाक्यकैः। तदात्मानंस्वयमकुरुतेतिवाक्यतश्चहि।।
विवृताविवृताभ्यामेकस्यैवहिचिदात्मनः। एकानेकात्मसंसिद्धिं श्रुतिराहसनातनी।।
आत्मसिद्धिर्द्विधाप्रोक्तामुख्यगौणविभागतः।
श्रुत्यामनेकात्मपरावाक्यास्युर्गौणसंज्ञकाः।।
एकात्मबोधकायेस्युर्वाक्यास्तेमुख्यसंज्ञकाः।
तात्कालिकात्मसंसिद्धिर्गौणवाक्यैरुदाहृता।।
स्वतसिद्धात्मसंसिद्धिर्मुख्यवाक्यैरुदाहृता। असिद्धिर्गौणसंसिद्धिरितिवेदानुशासनम्।।
एकात्मसंसिद्धिमेवलक्षीकृत्युश्रुतिस्स्वयम्। अनेकात्मत्वसंसिद्धिंप्राहशास्त्रेष्वनेकधा।।
उपाधिनिरुपाधिभ्यामेकस्मिन्परमात्मनि। एकानेकात्मसंसिद्धिर्घटत्येवंनसंशयः।।
ब्रह्माविष्णुमहेशानसूर्यस्कन्दादयःक्रमात्। भविन्तस्वस्वरूपेणपरमात्मैवकेवलम्।।
देहोपाधिवशादेवानेकात्मत्वंपरात्मनः। अनेकत्वमनित्यंस्यादात्मत्वंनित्यमेवहि।।
नित्यस्यैवात्मसंसिद्धिरनित्यस्यकदाचन। ब्रह्माविष्णुमहेशानसूर्यादिषुयथाक्रमम्।।
यदस्तिनामरूपेद्वेतदुपाधिरितीरितम्। नामरूपविहीनात्मायोस्तितेषुनिरंशकः।।
सर्वावभासकस्साक्षीसएवैकात्मनास्थितः। एतावदुक्तखंदर्भादात्मसिद्धिंस्वभावतः।।
नामरूपाद्युपाधित्वमंगीकृत्युश्रुतिस्स्वयम्।
अनेकात्मत्वमुक्त्वाथसिद्धान्तत्वेनकेवलम्।।
एकात्मसिद्धिमेवाहमुख्यवाक्यैर्यथाक्रमम्। सूर्यआत्मेतिवाक्येनाथर्वकेपरमार्थतः।।
स्वतस्सिद्धात्मानमेवसूर्योपनिषदिक्रमात्। सूर्योपाधिंपुरस्कृत्यगौणवाक्यात्स्वभावतः।।
तत्साक्षिण्यात्मसंसिद्धिरुक्तस्यादितिनिर्णयः।।
एवमेकात्मसंसिद्धिमुक्त्वाशास्त्रप्रमाणतः। तदात्मलक्षणमपि संग्रहेणाद्यकीर्त्यते।।

।।तदुक्तमात्मव्याख्याने।।

जगत्सृष्टिस्थितिलयकारणत्वंतथैवहि।व्यापकत्वमसंगत्वमद्वितीयत्वमेवच।।
निरधिष्ठानरूपत्वंनिर्गुणत्वमतःपरम्। सर्वाधिष्ठानरूपत्वंनिरंशत्वंस्वभावतः।।
सच्चिदानन्दरूपत्वंनित्यत्वंचयधाक्रमम्। एतेदशस्वभावेनयस्यास्तिसततंस्वतः।।

स आत्मेतिविशेषेणज्ञानिभिःपरिकीर्तितः।।
अन्यच्च।।
निमित्तत्वमुपादानकारणत्वंतथैवच।। साक्षित्वंचैवक्रमशोजगत्सृष्ट्यैवकेवलम्।
स्वेमहिम्निस्वयंस्थित्वास्वस्मिन्नेवस्वयंक्रमात्। स्वेक्षणेनस्वशक्त्याचस्वप्रवेशेनतत्त्वतः।
उपाधिनिरुपाधिभ्यांयदात्मेतिस्वभावतः। तदात्मेतिविशेषेणप्रवदन्त्यात्मवेदिनः।।
अपिच।।
यदाप्नोतियदादत्तेयच्चात्तिविषया निह।
यच्चास्यसन्ततोभावः तस्मादात्मेतिकीर्त्यते।।
इत्यादि।
सूत्रादिमपदादेवमात्मसिद्धिंप्रमाणतः। उक्तवाधिष्ठानसंसिद्धिरिदानींसंप्रचक्षते।
सूत्रेपंचदश न्यायादधिष्ठानत्वमात्मनः। तृतीयपदतस्तद्वद्दितीमपदतस्स्मृतम्।
तयोरादौ पंचदश प्रमाणोक्तिंनिरूप्यच। पश्चादधिष्ठानसिद्धिरात्मनस्सन्निरूप्यते।।

।।१५ स्वतस्सिद्धन्यायसूत्रम्।।

शक्तित्रय विशिष्टत्वेसत्येकस्मिन्नात्मन्यधिष्ठानान्त राभावात्सर्वाधिष्ठानभूत ब्रह्मात्मनास्याद्विवृताधिकारश्चस्वस्मिन!।।

।।बोधानन्द वृत्तिः।।

शक्तित्रयविशिष्टत्वादेकस्मिन्परमात्मनि। अधिष्ठानान्तराभावात्स्वस्मिन्नेवस्वभावतः।।
सर्वस्याधिष्ठानरूपाब्द्रह्माकारेणकेवलम्। विवृतत्वाधिकारत्वंसहजंस्यादितीरितम्।।

।।शक्तित्रयमुक्तमात्मशक्ति विलासे।।

अत्यद्भुतास्स्वतस्सिद्धानानाचित्रविचित्रकाः।
शक्तयस्सन्त्यसंख्याकाश्चिन्मयेपरमात्मनि।।
आत्मनस्सहजानित्यामहावेगप्रकाशकाः। प्रधानशक्तयस्तासुमुख्यास्तिस्रइतीरिताः।।
एतासु विवृतशक्तिः प्रथमेतिप्रकीर्तिता।
द्वितीयाव्यापकाशक्तिश्चिच्छक्तिस्स्यात्तृतीयका।।
इत्युक्तंचित्सुखाचार्यैः एताएवविशेषतः। प्रोक्ताश्शक्तित्रयमितिन्यायसूत्रेयथाक्रमम्।।
यथाजलतरंगाद्या अस्पृष्ट्वासूर्यमण्डलम्।
तस्यनानाविकारेण कुर्वन्तिविवृतत्वताम्।।
तथैवविवृतशक्तिस्तमस्पृष्ट्वामहेश्वरम्। विवृतत्वंकल्पयति तस्यैवपरमात्मनः।।
तथैवव्यापकाशक्तिर्निश्चैतन्येजडात्मके। विवृताकाररूपेस्मिन्जगतिस्वीयतेजसा।।
प्रविश्यासंगभावेनतद्व्याप्याकाशवत्क्रमात्। दत्वास्वसन्निधानेनचैतन्यंजगतस्स्वयम्।।
अहंकारंपुरस्कृत्यव्यवहारादिषुक्रमात्। स्वतःप्रवृत्तिंसर्वत्रप्रकल्पयतिनान्यथा।।

चिच्छक्तिर्विवृताकारंजगदेतच्चराचरम्। पश्चात्तदन्तर्बहिश्चस्वभासाभासयेत्पुनः।।
स्वप्रकाशदेवस्वस्मिन्साक्षिरूपेणसंस्थिता। सद्भावत्वमभावत्वंवस्तुनः पश्यतिस्वयम्।।
यतस्स्वविवृतशक्तयाजगद्रूपंजडात्मकम्।
यतोव्यापकशत्त्कयाथजगच्चैतन्यरूपकम्।।
संर्वावभासकत्वंचस्वचिच्छक्तयायथाक्रमम्। यतोभवेत्ततोधिष्ठानान्तरत्वंपरात्मनः
द्वितीयवस्त्वभावत्वान्नास्त्यैवेतिनिरूपणात्। स्वतोधिष्ठानसंसिद्धिर्घटत्येवनसंशयः।।
एवंनिरूप्याधिष्ठान सिद्धिकारणमात्मनः। अथेदानीमधिष्ठानलक्षणंसंप्रचक्षते।।
तदुक्तमात्मतत्त्व प्रकाशिकायाम्।।
अधिकृत्यजगत्सर्वं वर्ततेयत्स्वभावतः। तदधिष्ठानमित्याहुश्शास्त्रेषुबहुधाबुधाः।।
अन्यच्च।।
यब्दिभर्तिजगत्संर्वजगद्यन्नबिभर्तिहि। तदधिष्ठानमित्याहुर्ज्ञानिनस्तत्त्वदर्शिनः।।
इतिसृष्टिविलासे।।
अन्यच्च।।
यत्स्वमायोपाधिशक्त्याजगदेतच्चराचरम्।
सृष्ट्वातदन्तरेपश्चादन्तर्यामितयास्वयम्।।
स्थित्वासंधार्यतेसर्वमसंगत्वेनकेवलम्। तदेवाधिष्टानमितिप्रवदन्तिमनीषिणः।।

इतिप्रपंचलहर्याम्।।

अपिच।।
निमित्तत्वमुपादानत्वमात्मत्वंतथैवहि। निराधारस्वभावत्वंसर्वाधारत्वमेवच।।
सर्वावभासकत्वंचयस्यास्तिसततंस्वतः। तमेवाधिष्ठानमितिप्रवदन्तिमनीषिणः।।
एवंसूर्योपनिषद्वाक्यप्रतमाणानुसारतः। सूर्योपार्धिपुरस्कृत्यसाक्षिणःपरमात्मनः।।
श्रुतिवाक्यप्रमाणेनन्यायसूत्रबलेनच। उक्त्वाधिष्ठानसंसिद्धिमात्मसंसिद्धिमेवच।।
अथेदानींसूर्यकिरणशक्तिसंयोजनक्रमात्। ब्रह्माण्डादिक्रमादेतज्जगत्सृष्टिंविशेषतः।।
आलोंड्यपूर्वशास्त्राणियथामतिनिरूप्यते।।

।।सृष्ट्धिकारः।।

।।सूत्रम् २।।

।।तत्सृष्टिरसंगाच्चिच्चैत्याभ्यामूर्ण नाभिवत्।।

।।बोधानन्द वृत्तिः।।

रवेरधिष्ठानसिद्धिमात्मसिद्धिंचसंग्रहात्। एवमुक्त्वाजगत्सृष्टिक्रममद्यनिरुप्यते।।
सृष्टिप्रबोधकपदान्यस्मिन्चत्वार्यथाक्रमम्। सन्तितेष्वादिमपदादात्मसृष्टिःप्रदर्शितः।।
सृष्ट्यामसंगभावत्वमात्मनोक्तंद्धितीयतः। निमित्तोपादानशक्तिद्वयमुक्तंतृतीयतः।।
चतुर्थपदतस्सृष्टेर्दृष्टान्तस्सन्निदर्शितः। एवंपदार्थःकथितस्संग्रहार्थोनिरूप्यते।।

चिज्छक्तिश्चैत्यशक्तिश्चेत्यात्मशक्तिर्द्विधामता।
ताभ्यामसगंभावेनपरमात्मानिरन्जनः।।
अनेककोटिब्रह्माण्डाकारेणैतज्जगत्स्वयम्। स्वसन्निधानमात्रेणैवोर्णनाभिरिवासृजत्।।
सूत्रस्यैवंसमासेनसामान्यार्थोनिरूपितः। अथेदानींविशेषार्थस्सम्यगत्रनिरूप्यते।।
चिच्छक्तिस्सप्तमन्यायादात्मनोघटतिस्वतः।
चैत्यशक्तिस्सप्तदशन्यायतस्संप्रकीर्तितः।।
चित्वंचिच्छक्तिमत्वंचप्रदर्शयितुमात्मनः। स्वतस्सिद्धन्यायसूत्रद्वयमत्रनिरूप्यते।।

।।७ स्वतस्सिद्धन्यायसूत्रम्।।

स्वयंप्रकाशत्वेसत्येकस्मिन्वस्तुनि स्वप्रकाशच्चित्वं सर्वावभासकत्वाचिच्छंक्तित्वं च सहजंस्यात्सूर्यवत्।।

।।बोधानन्द वृत्तिः।।

रवेस्स्वयंप्रकाशत्वंयथातद्वत्स्वभानतः। सर्वावभासकत्वंचसहजंस्यात्स्वभावतः।।
तथैवात्मनिचित्वंचचिच्छक्तित्वमपिक्रमात्।
स्वतस्संभवतीत्यस्मिन्सूत्रेसम्यक्प्रदर्शितम्।।
तदर्थविशदीकृत्यसतांमोदायकेवलम्। समालोच्ययथाशास्त्रंसंग्रहेणप्रकीर्त्यते।।
स्वयंप्रकाशाखंडैकरसब्रह्मवकेवलम्। सूत्रेस्मिन्वस्त्वितिप्रोक्तंसंकेतत्वेनचक्रमात्।।
द्वितीयवस्त्वभावत्वात्स्वान्यत्तस्यैववस्तुनः। स्वयंप्रकाशमानत्वमेकत्वंचयथाक्रमम्।।
घटत्येवस्वभावेनश्रुतिमानानुसारतः। यतस्स्वयंप्रकाशत्वंततश्चित्वंपरात्मनः।।
सर्वावभासकत्वंतच्छक्तेर्यस्मात्स्वभावतः। तस्माच्चिच्छक्तित्वमपिब्रह्मणस्सहजंभवेत्।।
यदुक्तंसूर्यवदितितद्दृष्टान्तमितिस्मृतम्। स्वयंप्रकाशमानत्वेसत्येकस्मिन्परात्मनि।।
द्वितीयवस्त्वभावत्वादेकत्वंतद्वदेवहि। सर्वाबभासकत्वाच्चिच्छक्तित्वमपिचक्रमात्।।
प्रकाशान्तरराहित्यात्स्वंयभानत्वमात्मनः। स्वभावादेवसहजमितिन्यायनिरूपणम्।।
एवमुक्त्वासप्तमन्यायनिर्णयमतःपरम्। तथासप्तदशन्यायनिर्णःपरिकीर्त्यते।।

।।१७ स्वतस्सिद्धन्यायसूत्रम्।।

।।यत्र चिच्छक्तिस्तत्रचैत्यशक्तिसंभवस्सहजं स्याब्दीजांकुरवत्।।

।।बोधानन्द वृत्तिः।।

बीजेयथांकुरोत्पत्तिस्सहजंस्यात्तथैवहि।
स्वतोस्तियत्रचिच्छक्तिस्तत्रकर्मविपाकंतः।।
चैत्यशक्तेस्संभवोपिसहजंस्यादितीरित्तम्।
तस्माच्चिच्छक्तिवच्चैत्यशक्तिरप्यात्मनस्स्वतः।।

सहजंस्यादितिसप्तदशन्यायविनिर्णयः।
शक्तिद्वयंचात्मनोक्तमेवंन्यायद्वयेनहि।।

।।३ सूत्रम्।।

।।तस्यांयदीषत्स्पन्दनमग्नषिमोभ्यां तच्चैत्य शक्तिरिति।।

।।बोधानन्द वृत्तिः।।

एवंन्यायद्वयाच्छक्तिद्वयमुक्त्वापरात्मनः। इदानींचैत्यशक्तिस्वरूपमत्रनिरूप्यते।।
चैत्यशक्तिस्वरूपप्रबोधकानियथाक्रमम्। पदानिसप्तसूत्रेस्मिन्निर्णितानियथाविधि।।
तेष्वादिमपदाच्चिच्छक्तिस्वरूपःप्रदर्शितः। द्वितीयपदतः प्रोक्तंस्पन्दनस्यविशेषणम्।।
तृतीयपदतश्शक्तेरीषत्स्पन्दनमीरितम्। चतुर्थपदतोग्नीषोमशक्तिद्वयमीरितम्।।
तथैवपंचमपदादुक्तंचैत्यविशेषणम्। तदुत्तरपदाच्चैत्यशक्तिरूपः प्रदर्शितः।।
तथैवसप्तमपदात्तत्प्रकारोनिरूपितः। एवंपदार्थमुक्तवाथसूत्रस्यविधिवत्क्रमात्।
क्रोडीकृत्ययथाशास्त्रमेतेषामर्थनिर्णयः। अथेदानींसंग्रहेणयथामतिनिरूप्यते।।
प्रपंचप्रळयेसर्वप्राणिनांकर्मवासनाः। शुक्लकृष्णरजोरूपाःस्वभावेनपृथक्पृथक्।।
प्रविश्याग्नीषोमशक्त्यांसाम्यावस्थांव्रजन्तिहि।
तैस्सहाग्नीषोमशक्तिश्चिच्छक्त्यामथलीयते।।
तदन्तर्गतचित्प्रतिबिंबश्चापिस्वयंक्रमात्। बिंबरूपेचितितस्स्वस्वरूपेणलीयते।।
पश्चादग्नीषोमशक्त्यन्तर्गतकर्मवासनाः। क्रमात्मकालविशेषणपरिपक्वंगतायदि।।
अत्यन्तसूक्ष्मरूपेण् विकासत्वंभजन्त्यथ।
पश्चात्तद्वासनास्स्वस्वशक्तिभिःकर्मगर्भितैः।।
चिल्लीनप्रतिबिंबांशुप्रकाशांशमतःपरम्। वालाग्रशतभागस्यदशैकांशप्रमाणतः।।
क्रमात्सूरणमार्गेणाकर्षयन्तिस्वभावतः। पश्चात्तच्छक्तिसंयुक्तास्तेग्नीषोमीयमण्डलम्।।
प्रविशन्त्यतिवेगेनस्वनीडमिवपक्षिणः। तत्रत्याग्नीषोमशक्तिद्वयंव्याप्यद्विधाक्रमात्।।
स्वसन्निधानमात्रेणविभज्याथयथाक्रमम्। वामेसोमंदक्षिणेग्निंस्थापयामासतुःक्रमात्।।
पश्चात्तयोर्भ्रामणत्वंविंशतिन्यायतोभवत्। तद्भ्रामणप्रमाणंतुसंख्ययात्रप्रदृश्यते।।
शतकोट्यष्टलक्षत्रिसहस्त्रत्रिशतंक्रमात्। निमेषमात्राद्भ्रमणमग्निशक्तेस्स्वभावतः।।
तथैवसोमशक्तेश्चप्रभवत्यतिवेगतः। एवमग्नीषोमीयमण्डलेस्मिन्भ्रमणंतयोः।।
यदाभवतिवैचित्र्यात्तदाचिज्छक्तिरंजसा।
स्वान्तर्गताग्नीषोमीयशक्तिभ्यांक्षुभिताभवेत्।।
तेनेपत्स्पन्दनंतस्यांभवत्यत्यत्वत्वसूक्ष्मतः। यदीषत्स्पन्दनंतस्यांतदेवात्रविचारतः।।
चैत्यशक्तिरितिप्रोक्तंसूत्रेस्मिन्सप्रदायतः। एवमुक्त्वासंग्रहार्थसप्रमाणयथाविधि।।
अथेदानींविशेषार्थस्सम्यगत्रनिरूप्यते। उक्तमग्नीषोमशक्त्योर्भ्रमणंन्यायसूत्रतः।।
तद्विंशतिन्यायसूत्रंविविच्यात्रप्रचक्षते।

।।२० स्वतस्सिद्धन्यायसूत्रम्।।

शक्तेश्चलनत्रैविध्यंस्वोष्णतरंगघर्षणादग्निवत्

।।बोधानन्द वृत्तिः।।

रूपद्वयंभवेच्छक्तेर्लोहितंप्रयमंतयोः। द्वितीयरूपंचपलमितिप्राहुर्मनीषिणः।।
यललोहितत्वरूपंत्यातत्युंशक्तिरितिस्मृता। तपनत्वात्तापनेतिप्रवदन्तिमनीषिणः।।
अचलातापसंयुक्तानित्यासूक्ष्मस्वरूपिणी। स्वभावात्तपनाशक्तिस्सर्वत्रव्याप्यतिष्ठिति।।
शक्तेश्चलनरूपंयत्तत्स्त्रीशक्तिरितीर्यते। तपनोदागरितोष्णस्वरूपासेतिप्रकीर्तिता।।
तपनाशक्तिसान्निध्यादेतच्छक्त्यांस्वभावतः।
उष्णाधिक्यंभवेत्तस्मात्तरंगास्सूक्ष्मरूपिणः।।
एकादशोत्तरत्रिशतसंख्याकास्सर्वतोमुखाः।
छोटिकावच्छिन्नकालेप्रभवन्तियथाक्रमम्।।
त्रिविंवचलनंपश्चात्तत्संघर्वगतःक्रमात्। भवत्येवाग्निवत्तस्यामितिन्यायविनिर्णयः।।

।।तरंगलक्षणमुक्तंशक्तितन्त्रे।।

प्रयमोग्दगारिताशक्तिर्लोहितेनस्वभावतः। उच्यतेतपनइतिशास्त्रेषुज्ञानवित्तमैः।।
तपनत्रयमुष्णंस्यात्तदुष्णत्रयमुल्बग। पंवोल्वणात्स्पन्दनंत्याच्चलनस्स्पन्दनत्रयम्।।
तत्पंचकंतरंगस्स्यात्तत्रयंलिंकमुच्यतेत्यादि।।

।।चलनत्रैविध्यमुक्तंशक्तितन्त्रे।।

बाह्यप्रयत्नस्त्रिविधश्शक्तिवेगोन्मुखेक्रमात्। प्रयत्नोन्मुखचलनश्चेतिशक्तित्रयंबुधैः।।
एतत्तरंगसंघर्षणादुष्णस्येतिकीर्तितम्। वेगप्रयत्नमीषत्स्पन्दनमित्युच्यतेबुधैः।।
पूर्णस्पन्दनमेवात्रवेगोन्मुखमितीरिम्। वेमारंभश्चलनमित्युक्तंशास्त्रविदांबरः।।

।।कालप्रमाणमुक्तंतत्रैव।।

निमेषकालस्स्यादीषत्स्पन्दनस्यतथैवहि। वेगोन्मुखस्यतत्कालत्रयमित्युच्यतेबुधैः।।
भवेत्तद्द्विगुणःकालःचलनस्ययथाक्रमम्। चलनत्रयकालोत्रवेगइत्यभिधीयते।।
तद्वेगकालदशकमतिवेगइतिस्मृतः। अत्यन्तवेगोतिवेगदशकंभवतिक्रमात्।।
तच्छतंस्यान्महावेगइतिवेगविनिर्णयः। वेगात्पूर्वप्रयत्नंयच्चलनत्रयमुच्यते।।
एवंरूपद्वयंशक्तेरुक्तंन्यायप्रमाणतः। चलनत्रयस्वरूपमपिशास्त्राद्यथाक्रमम्।।
इतितृतीयसूत्रार्थस्संग्रहेणयथाक्रमम्। कीर्तितंभवतिन्यायप्रमाणादपिशास्त्रतः।।

।।४ सूत्रम्।।

।।तद्वेगोत्क्षेपणात्तत्संभवस्तस्या द्वीपवत्।।

।।बोधानन्द वृत्तिः।।

पूर्वसूत्रेचैत्यशक्तिरितीषत्स्पन्दनंस्मृतम्। तथास्मिन्नग्नीषोमशक्त्याविर्भावःप्रचक्षते।।

तदग्नीषोमशक्तयुदयबोधकपदानिहि। चत्वार्यस्मिन्निर्णितानिपदच्छेदनतःक्रमात्।।
पूर्वोक्तचैत्यवेगोत्क्षेपणमादिपदात्स्मृतम्। द्वितीयपदतश्चाग्नीषोमशक्तयुदयस्स्मृतः।।
चिच्छक्तिरीरितातेषुतृतीयपदतस्तथा। द्वीपदृष्टान्तमुक्त याच्चतुर्थपदतःक्रमात्।।
पदानामर्थमुक्त्वाथसूत्रस्येवंयथाक्रमम्। तथेदानींसंग्रहेणसामान्यार्थोनिरूप्यते।।
गुणत्रयप्रभेदेनचिच्छक्त्यांस्पन्दनत्रयम्। अभूत्क्रमात्स्वभावेनतान्समाहृत्यचित्स्वयम्।।
पृथक्कृत्वागुणान्वेगादेकीकृत्यस्वतेजसा। स्वशक्तिगर्भमध्येथस्थापयामाससत्वरम्।।
तथैवतद्वेगत्रयंचाहृत्यस्वीयतेजसा। एकीकृत्योर्ध्वप्रदेशेउत्क्षिपद्वेगतस्ततः।।
पश्चात्त्रिवर्णसंयुक्तासृष्टिबीजस्वरूपिणी।
पूर्वोक्ताग्नीषोमशक्तिस्तद्वेगोत्क्षेपणात्स्वयम्।।
कूर्मशक्त्युक्षेपणेनयथाद्वीपोदयस्तथा। प्रादुर्बभूवपूर्वोक्तचिच्छक्त्यांपूर्वकल्पवत्।।
सूत्रस्यैवंसंग्रहेणसामान्यार्थोनिरूपितः। इदानींतद्विशेषार्थःकिंचिदत्रप्रकीर्त्यते।।

।।द्वीपलक्षणमुक्तंद्वीपविवेके।।

द्विधाविभज्योदकंयदूर्ध्वमागच्छति त्वतः। तद्द्वीपइतिशास्त्रेषुप्रवदन्तिमनीषिणः।।

।।उक्तंहिनामार्थकल्पे।।

।।१३ परिच्छेदः, ६ सूत्रम्।।

।।द्वीपःपंचवर्णविसर्गशक्तिसंमेळनादिति।।

।।विश्वंभरवृत्तिः।।

सूत्रेविसर्गसहितपंचवर्णाःप्रकीर्तिताः। तेविभज्यक्रमेणात्रपृथक्पृथङ्निरूप्यते।।
द्वीपशब्देद्ईव्प्अविसर्गाःपरस्परम्। मिळितास्सन्तिशास्त्रोक्तप्रकारेणयथाक्रमम्।।
एतेसांकेतकाःप्रोक्ताश्शास्त्रेस्मिन्संप्रदायतः।
एतेषुवर्णसंक्ल्प्तशक्तयष्षड्धनास्मृताः।।
आसांसमेळनाद्वारिगर्भेद्वीपःप्रजायते।।

।।तदुक्तंशक्तितन्त्रे।।

कौर्मीचकाश्यपीसिंहीतापनाबाडबोष्मिका। द्वीपोत्पत्तिकराह्येताः
क्रमात्षड्घनशक्तयः।।

इति।।

।।षट्शक्तिनिर्णयोक्तश्शक्तिसर्वस्वे।।

कूर्मपीठाग्नेयकक्ष्यमुखसप्ततिमेक्रमात्। द्व्यशीतिकोट्यष्टलक्षपंचोत्तरसहस्त्रकाः।।
शक्तिप्रसारणकेन्द्ररेखास्सन्तिपृथक्पृथक्।
तासुद्विकोटिविंशल्लक्षाष्टाविंशतिकेन्द्रतः।।
छोटिकावच्छिन्नकालेशक्तयःपंचकोटयः। प्रसरन्त्यतिवेगेनजलकोशान्तरंप्रति।।
पंचलक्षत्रिसाहस्त्रसप्तोत्तरशतात्मिका। घनशक्तिःक्रमात्तासुदवर्णेनात्रवर्णिता।।

तथाकश्यपसूर्यस्यपीठपूर्वमुखान्तरे। न्यर्बुदानांपंचदशकोटीनांदशपंचच।।
लक्षाणांपंविंशत्रिसहस्त्रैकशतंक्रमात्। शक्तिप्रावाहिकमुखकेन्द्रास्सन्तिस्वभावतः।।
तेषुत्रिशतकोटित्रिलक्षद्विशतकेन्द्रतः। छोटिकावच्छिन्नकालेशक्तयश्शतकोटयः।।
प्रवहन्त्यतिवेगेनजलगर्भाशयंप्रति। विंशत्कोटित्रिलक्षद्विसहस्त्रैकशतात्मिका।।
ईकारेणक्रमात्तासुघनशक्तिर्निरूपिता।।
अभ्रूतवाडवापिठेशान्यकक्ष्यमुखाष्टमे। द्विकोटिसप्तलक्षाष्टसहस्त्रत्रिशतात्मिकाः।।
शक्तिप्रावाहिकमुखकेन्द्रास्सन्तियथाक्रमम्। तेष्वेककोटित्रिलक्षद्व्युत्तरशतकेन्द्रतः।।
निभेषावच्छिन्नकालेशक्तयस्सप्तकोटयः। प्रवहन्त्यतिवेगेनजलगर्भान्तरंप्रति।।
एकलक्षाष्टसाहस्रदशोत्तरशतात्मका। घनशक्ति क्रमात्तासुवकारेणाभिवर्णिता।।
अव्यक्तजलपीठस्थकक्ष्यवायत्र्यकेन्द्रतः। एकोनविंशत्कोटिचतुर्लक्षैकादशात्काः।।
शक्त्युत्पत्तिस्थानमुखकेन्द्रास्सन्तियथाक्रमम्। तेषुद्वादशसाहस्रद्वात्रिंशतिमकेन्द्रतः।।
निमेषकालमात्रेणद्वात्रिंशल्लक्षशक्तयः। प्रवहन्त्यतिवेगेनजलकोशान्तरंपति।।
नवसाहस्रचत्वारिंशदुत्तरशतात्मिका। घनशक्तिःपवर्णेनतास्वत्रपरिकीर्तिता।।
तापनाशक्तिपीठस्थाग्नकक्ष्यमुखान्तरे। शतकोटिचतुर्लक्षनवोत्तरशतात्मिकाः।।
शक्तिप्रवाहमुखकेन्द्ररेखास्सन्तिहिक्रमात्।
तासुद्विकोटिविंशल्लक्षाष्टाविंशतिकेन्द्रतः।।
निमेषावच्छिन्नकालेद्वात्रिंशत्कोटिशंक्तयः। प्रसरन्त्यतिवेगेनजलशक्त्यन्तरंप्रति।।
तासुद्विकोटित्रिलक्षोपरिपंचदशात्मिका। घनशक्तिःपकारोपरिस्थाकारेणवर्णिता।।
आकाशसिंहिकाशक्तिकेन्द्ररेखाष्टकोटयः। तासुद्वात्रिंशदुत्तरशतकेन्द्रमुखान्तरात्।।
अशीतिकोट्यष्टलक्षदशसाहस्रशक्तयः। प्रसरन्त्यतिवेगेनजलगर्भाशयंप्रति।।
एकोनविंशदुत्तरत्रयादशशतात्मिका। घनशक्तिर्विसर्गेणतासुसम्यगुदाहृता।।
सूर्यदित्तारवस्वग्निरुद्रसंख्याप्रमाणतः। उत्तषड्विधशक्तीनामंशमेळनतर्जले।।
भूगर्भजलकोशेषुस्वतोजलघनात्मकः। गर्भोभवतिताद्दिवपइतिप्राहुर्मनीषिणः।।
वाल्मीकिगणितरीत्यात्रोक्तश्शक्तिविनिर्णयः।।

इत्यादि।।

।।५सूत्रम्।।

।।भवत्यस्यांत्रिगुणसाम्याच्चित्प्रतिबिंबाकर्षणं दर्पणवदेकोनत्रिंशन्न्यायेन।।

।।बोधानन्द वृत्तिः।।

पूर्वसूत्रेग्नीषोमशक्तयाविर्भावःप्रकीर्तितः। तस्यांचित्प्रतिबिंबाकर्षणमस्मिन्निरूप्यते।।
चित्प्रतिबिंबाकर्षणप्रबोधकपदानिहि। षण्णिर्णितानिविधिवत्पदच्छेदनतःक्रमात्।।
तत्रादिमपदादग्नीषोमशक्तिर्निरूपिता। द्वितीयपदतस्तद्वत्तद्गुणत्रयमीरितम्।।

एवंतृतीयपदतःप्रतिबिंबश्चितेस्समृत। उक्तंदर्पणदृष्टान्तश्चतुर्यपदतःक्रमात्।।
तथैवपंचतपदान्न्यायमानंनिरूपितम्। भवतीतियदुक्तंत्यात्तत्कियापदमुच्यते।।
पदार्थमेवमुक्तवाथसामान्यार्थोधुनोच्यते। रजस्सत्वतमोरूपगुणसाम्यत्वकारणात्।।
एकोनत्रिंशतिन्यायमनुसृत्यस्वभावतः। यथाभवतिखादित्यप्रतिबिंबस्तुदर्पण।।
भवत्यग्नीषोमशक्तायांप्रतिबिंबश्चितेस्तथा। एवमुक्त्वासंग्रहेणसामान्यार्थस्तथैवहि।।
इदानींतद्विशेषार्थोयथाशास्त्रंनिरूप्यते। प्रतिबिंबाकर्षणमित्युक्तंयत्सूत्रतःक्रमात्।।
तदेवात्रविशेषेणयथाशास्त्रंनिरूप्यते।।

।।तदुक्तंरूपाकर्षणतन्त्रे।।

स्थावराणांजगंमानामष्टशक्तितभिरेवहि। स्याद्रूपाकर्षणंयन्त्रात्प्रतिबिंबस्वरूपतः।।
।।उक्ताह्यष्टशक्तयस्सौदामिनीकलायाम्।।

परिच्छेदः७, सूत्रम् ११

।।र, व, स, न, भ, ज, य, क, शक्तिसंयोगात्प्रतिबिंबाकर्षणम्।।

।।विश्वंभरवृत्तिः।।

रकारात्सूर्यकिरणशक्तिस्सूत्रेनिरूपिता। वकारात्षड्द्रावकाणांशक्तयस्संप्रकीर्तिताः।।
सकारेणांधकारस्यशक्तयोष्टनिरूपिताः। तथैवाकाशशक्तिश्चनवर्णेनविवेचिता।।
उष्णस्यरात्तयःपंचभकारेणाभिवर्णिताः। विद्युच्छक्तित्रयंतद्वज्जवर्णात्सन्निरूपितम्।।
यकारात्क्रमशोवायुशक्तयष्षोडशस्मृताः। पंचप्राणक्षारशक्तयःककाराद्विनिर्णिताः।।
एतास्स्वेकैकशक्तिसंयोगाद्यन्त्रादिषुक्रमात्। द्रावकालेपकादर्शोपरिसम्यवस्वभावतः।।
बिम्बस्यप्रतिबिंबत्वंबिम्बवद्भवतिक्रमात्। प्राणक्षारजलेनाथक्षाळयित्वामुहुर्मुहुः।।
आतपेस्थापयेदेववारंवारंययाक्रमम्। यावत्संपूर्णरूपप्रकाशस्स्फुटतरंभवेत्।।
तावत्प्रक्षालथेतद्वदातपेचापिनिक्षिपेत्। एतत्संस्कारतस्सम्यक्प्रतिबिम्बःप्रकाशते।।
एतद्रूपंस्थिरीकर्तुंपश्चात्सम्यग्यथाविधि। चूळीपुष्कलमंजूषादावकैस्साप्रमाणतः।।
संस्कारंकारयेत्सम्यक्पुनंश्शास्त्रविधानतः। चूळीद्रावकतस्सप्तवारंपुष्करद्रावकात्।।
दशवारंचविधिवन्मंजूषद्राकात्पुनः। क्रक्मात्पंचदशवारंसम्यक्संस्कारयेत्तथा।।
सम्यक्प्रक्षाळयित्वाथघटिकार्धपुनःपुनः। आतपेविन्यसेत्पश्चाज्जलपूर्णघटेन्यसेत्।।
पश्चात्तस्मिन्द्रावकाणांशतैकांशप्रमाणतः। मेळयित्वाकुंभिनीव्यासटिकायांदृढयथा।
संस्थाप्यसार्धघटिकापर्यन्तंकमलाग्निना। संपाचयेद्देवदारुकाष्ठैरेवयथाविधि।।
ततस्तस्मात्तमाहृत्यपदृवस्त्रेणवेष्टयेत्। तत्संगृह्यपुनश्शालीतुषामध्येनियोज्यच।।
चन्द्रिकायांत्रयोदश्यादित्रिरात्रंन्यसेद्यदि। अच्छेद्यत्वमदाह्यत्वमनाश्यत्वंतथैवहि।।
दुर्गमत्वंचकीटाद्यैर्वम्रिभिश्चतथैवच। लगुडाद्यैरभेद्यत्वंचिरंजीवित्वमेवच।।
संप्राप्यबिंबवत्सम्यक्प्रकाशतिनसंशयः।।

इत्यादि।

।।एतदुक्तं शौनकीये।। तत्रतावच्छौनकंसूत्रम्।।

अथातस्स्थवरजंगमानां बिम्बस्यप्रतिबिम्बाकर्षणविधिं व्याख्यास्यामस्तैलदर्पणकाच।
मणिशिलालोहदारुजिन्मौक्तिकनवरत्न
पुत्रपुष्पफलत्वगभूकपंचभूतेषुपंचविग्ंश्यात्संस्कारै।
स्संकारितेषुश्यात्क्त्यष्टकसंयोजनात्प्रतिबिम्बाकर्षणंभवति।। अथसंस्कारिणि।।
तैलानांनव, जलानांद्वादश, दर्पणानांषोडश, मणीनांत्रयोदश, शिलानामेकादश, लोहानांपंचदश, दारूणामेकोनविग्ंशति, र्जितांद्वाविग्ंशति, मौक्तिकानांचतुर्दश, रत्नानामष्टादश, पत्राणांसप्तदश, पुष्पाणांद्वाविग्ंशतिः, फलांनामेकविंग्शतिर्वस्त्राणांद्वाविग्ंशतिस्त्वचांपंचविग्ंशतिरभ्रकस्यदश पृथक्पृथग्भूतानांपंचविग्ंशतिः पंचविग्ंशतिरिति।।

।।अस्यार्थः।। विश्वंभरवृत्तिः।।

रूपंरूपंप्रतिरूपंबभूवेतिस्वाक्यतः। श्रुतिर्यदाहतत्सम्यक्शास्त्रोक्तविधिनाक्रमात्।।
सुविचार्ययथाकामंशौनकोभगवानृषिः। स्थावराणांजंगमानां बिम्बरूपाकृतेःक्रमात्।।
श्रुत्युक्तप्रतिबिम्बाकर्षणोपायविधिंस्वतः। बालानांसुखबोधायसूत्रेस्मिन्वक्ष्यतिक्रमात्।।
तत्रादौप्रतिबिम्बकर्षणस्थानान्यथाक्रमम्। महर्षिमातंगमतानुसारेणात्रसंग्रहात्।।
निरूप्यप्श्चात्तत्संस्कारविधिंसंप्रचक्षते।।

।।अथस्थानानि।।

तैलषट्कंजलशतंदर्पणाष्टकमेवच। द्वात्रिंशत्काचभेदाश्चमणिषट्कंतथैवहि।।
शिलाद्वादशकंतद्वल्लोहसप्तकमेवच। दारुद्वादशकंलाक्षात्रयंचैवयथाक्रमम्।।
मुक्ताफलाष्टकंरत्ननवकंचतथैवहि। पत्रषट्कंतथांपुष्पसप्तकंचफलाष्टकम्।।
पटद्वादशकंमर्चपंचकंचाभ्रकत्रयम्। भूतपंचकमित्यष्टादशस्थानान्यथाक्रमम्।।
प्रतिबिम्बाकर्षणार्हाणीतिप्राहुर्मनीषिणः।।
पंचविंशतिसंस्कारैस्संस्कृतेषुयथाविधि। एतेषुषड्द्रावकाणांसंयोगस्स्याद्यदिक्रमात्।।
बिम्बस्यप्रतिबिम्बाकर्षणंभवतिहिधृवम्।
प्रतिबिम्बस्याष्टादशस्थानान्युक्त्वायथाक्रमम्।।
संस्कारनिर्णयस्तेषांपृथक्पृथङ्निरूप्यते। वस्तुसंस्कारकल्पेतुसंस्काराबहवस्स्मृताः।।
प्रतिबिम्बाकर्षणार्थवस्तुसंस्कारकर्मणिं। तैलादिपंचभूतान्तवस्तूनांपंचविंशतिः।।
संस्कारास्तासुविधिवद्वस्तुतत्वानुसारतः। प्रोक्तारताएवसंगृह्यसंग्रहेणात्रकीर्त्यते।
निर्मलश्वप्रकाशश्चरसगर्भःप्रसारणः। व्यापकोचुंबकश्चैवकिरणाकर्षणस्तथा।।
आकाशग्रहणस्तद्वच्छक्तिग्राहकमेवच। वर्णग्रहोचित्ररेखाग्रहणोरूपसंग्रहः।।
गर्भप्रवेशोन्तः प्रकाशलयनोन्तः प्रदर्शकः। निश्वलोदृग्ग्रहश्चैवअणुसंग्रहणस्तथा।।
द्विमुखीकरणस्तद्वद्विजातीयपरिग्रहः। असंगोष्णश्शीतलश्चतथाबिम्बपरिग्रहः।।

इत्युक्ताः पंचविंशतिसंस्कारावस्तुशोधकाः। एतैः पूर्वोक्तसंख्यानुसारेणैवयथाक्रमम्।
प्रतिबिंबाकर्षणोपयुक्तानांवस्तुनांक्रमात्। संस्कारयेद्यथाशास्त्रंपृथक्पृथक्पुनः पुनः।।
संस्कारितेषुतैलादिपं चविंशतिवस्तुषु। प्रतिबिंबाकर्षणार्हयन्त्राण्यपिपृथक्पृथक।।
षोडशाळिप्रमाणेनतम्: प्रोक्तस्तथैवहि। पंचलिंकप्रमाणेनरक्तवर्णइतिक्रमात्।।
प्रकाशोष्टाविंशतिभ्राजिमनइतिस्मृतः। एतत्त्रयंक्रौळियन्त्रमुखात्तत्तत्प्रमाणतः।।
प्रतिबिम्बाकर्षणादौतत्प्रदेशेप्रसारयेत्। पश्चातैलादिवर्गेषुप्रतिबिम्बापकर्षणे।।
पूर्वोक्तषड्द्रावकाणांशक्तयस्सन्नियोजयेत्। विद्युत्संयोजनंकृत्वाप्रतिबिंबसमाहरेत्।।
विद्युच्छक्तिंविनाकेचित्प्रवदन्तिमनीषिणः। द्रावकाणिविनाकेचित्तथैवप्रवदन्तिहि।।
इत्यादि।।

सूत्रोक्तचित्प्रतिबिम्बाकषर्णाख्यपदस्यहि। एवंशास्त्रोक्तविधिनाविशेषार्थोनिरूपितः।।
इतिपंचमसूत्रस्यतात्पर्यस्संप्रकीर्तितः।।

।।सूत्रम् ६।।

।।तत्संयोगादत्यन्तभ्रमणस्तद्गुणानाम्।।

।।बोधानन्द वृत्तिः।।

प्रतिबिम्बविधिः प्रोक्तः पूर्वसूत्रेचितेः क्रमात्।
तत्संयोगात्कीर्त्यतेस्मिन्प्रकृत्यांत्रिगुणभ्रमः।।
गुणभ्रमणबोधकपदान्यस्मिन्त्रयः क्रमात्। प्रतिबिंबस्यसंयोगस्तत्रादिमपदात्स्मृतः।।
अत्यन्तभ्रमणंतद्वद्दि्वतीयपदतः क्रमात्। उक्तमग्नीषोमशक्तेर्गुणत्रयंतृतीयतः।।
पदार्थमेवमुक्तवास्व सामान्यार्थोधुनोच्यते।
यदग्नीषोमशक्तयांचित्प्रतिबिम्बमभूत्स्वतः।।
तत्सान्निाध्यबलात्तस्यास्त्रिगुणेषुयथाक्रमम्।।
अभूदत्यन्तवेगेन भ्रमणत्वंस्वभावतः। तृतीयसूत्रव्याख्यानेत्यन्तवेगस्यलक्षमण्।।
प्रतिपादितमस्माभिः पूर्वमेवयथाक्रमम्।।

।।सूत्रम् ७।।

।।तस्मात्तच्छक्तिसंमेळनं परस्परमेकादश न्यायेन।।

।।बोधानन्दवृत्तिः।।

त्रिगुणानांपूर्वसूत्रादत्यन्तभ्रमणस्स्मृतः। तेनसंमेळनंतच्छक्तीनामस्मिन्निरूप्यते।।
शक्तिसंमेळनक्रमबोधकानियथाक्रमम् पदानिसूत्रेचत्वारिनिर्णितानिपदक्रमात्।।
तत्रादिमपदात्सम्यग्गुणवेगः प्रदर्शितः। द्वितीयपदतस्तेषांशक्तित्रयमुदाहृतम।।
तृतीयपदतस्तासामन्योन्यत्वंनिरूपितम्। तथाचतुर्थपदतस्स्वतस्सिद्धः प्रदर्शितः।।
पदार्थमेवमुक्त्वास्यसामान्यार्थोधुनोच्यते।।

।।सामान्यर्थाः।।

एकादशस्वतस्पिद्धन्यरयसूत्रानुपारतः। गुणत्रयभ्रमणवेगात्तच्छक्तीनांपरस्परम्।।
अन्योन्याकर्षणात्सम्यङ्मेळनंभवतिस्वतः। एवंसामान्यार्थमुक्तवाविशेषार्थोधुनोच्यते।।

।।विशेषार्थः।।

एकादशन्यायइतिसूत्रेयत्प्रतिपादितम्। तदद्यविशदीकृत्ययथाशास्त्रंनिरूप्यते।।

स्वतस्सिद्धन्यायसूत्रम्।।

यस्मिन्नत्यन्तवेगस्तास्मिन्यरयोस्तादात्म्या त्वस्शक्त्यान्यशक्त्यपकर्षणंसहजंस्याच्चित्र कवत्।।

।।विश्वंभरवृत्तिः।।

य स्मिन्नत्यन्तवेगोस्तितद्वेगपरिपाकतः। यरयोर्मेळनंतस्मिन्तादात्म्याद्भवतिस्वयम्।।
तस्माद्वेगः पूर्वशक्तेर्भवेच्छतगुणाधिकम्।
पश्चात्स्वशक्त्यास्वोपान्तवस्तुशक्त्यपकर्षणम्।।
सहजंस्यात्स्वभावेनतस्यचित्रकवायुवत्। तृतीयसूत्रव्याख्यानेत्यन्तवेगोभिवर्णितः।।
सांकेतार्थः कथ्यतेद्यसूत्रस्थयरवर्णयोः।।

।।तदुक्तं शक्तिविलासे।।

वायुशक्तिरितिप्रोक्तोयकारस्तद्वदेवहि। उष्णशक्तिरितिप्रोक्तोरकारश्चस्वभावतः।।
वर्णसांकेतकादेवंशक्तिद्वयमुदाहृतम्।।

इत्यादि।।

।।शौनकोपि।। सूत्रम्।।

यकारोवायुरग्निरकार स्तत्संयोगाद्वेगइत्यादि।।

।।चित्रकलक्षणमुक्तंवायुतत्वप्रकरणे।।

द्वाविंशदुत्तरशतवायुवर्गाइतीरिताः। तेष्वावर्तवातवर्गस्सप्तषष्ठितमस्स्मृतः।।
आवर्तवायवस्तस्मिन्द्वाविंशतिरितीरिताः। सप्तमश्चित्रकोनामवायुस्तेष्वितिनिर्णितः।।
।।तल्लक्षमुक्ततंत्रव।।
दिक्प्रावाहिकवातानांनिरुद्धोयत्रवाभवेत्। तत्रचित्रगतिर्वायुः चित्रकोनामजायते।।
आवर्तगतिवेगाद्यास्ततत्स्वरूपमितिस्मृतः। तत्समीपस्थवस्तूनांतद्वेगादपकर्षणम्।।

इत्यादि।।

इत्थंसप्तमसूत्रस्यविशेषार्थोभिवर्णितः। संप्रदायानुसारेणयथाशास्त्रंयथामति।।

।।सूत्रम् ८।।

।।शक्त्योरन्योन्याकर्षणादावरणद्वयंप्रकाशस्य तस्माद्रुद्र इति।।

।।बोधानन्द वृत्तिः।।

शक्तिसंमेळनंसम्यक्पूर्वसूत्रेनिरूपितम्। सूत्रेस्मिन्चित्प्रकाशस्यावरणद्वयमुच्यते।।
आवरणप्रबोधकपदान्यस्मिन्यथाक्रमम्। पदच्छेदनतस्सप्तइतिसम्यग्विनिर्णितः।।
तत्रादिमपदात्सत्वतमश्शक्तीनिरूपिते। अन्योन्याकर्षणंप्रोक्तंद्वितीयपदतस्तयोः।।
क्रमात्तृतीयपदतःप्रोक्तमावरणद्वयम्। चतुर्थपदतस्तद्वच्चित्प्रकाशोनिरूपितः।।
तथैवपंचमपदात्कारणंसंप्रदर्शितम्। तदुत्तरपदान्नामचितेस्मस्यङ्निरूपितम्।।
प्रसिद्धार्थद्योतनार्थसप्तमंपदमीरितम्। पदार्थमेवमुक्तवास्यसामान्यार्थोधुनोच्यते।।

।।सामान्यार्थः।।

क्रमातसत्वतमोरूपगुणभ्रमणवेगतः। सत्वशक्त्याथतमसोभवेच्छक्त्यपकर्षणम्।।
तथैवचतमश्शक्तयासत्वशक्त्यपकर्षणम्। अनयोःपरस्पराकर्षणादावरणद्वयम्।।
प्रथमावरणंतत्रसत्शक्तिरितीरितम्। क्रमाच्चिप्रतिबिंबप्रकाशस्यभवतिस्वतः।।
तमसश्शक्तिरित्युक्तंरित्युक्तंद्वितीयावरणंतथा। प्रथमावरणंतस्यनैजंवपुरितीर्यते।।
तस्माद्विश्वाधिकोरुद्रोमहर्षिरितिहिश्रुतिः। प्राहगंभीरयावाचाअतोरुद्रइतिस्मृतः।।
स्वयंप्रकाशरूपत्वात्सत्घविग्रहतस्तथा। रुद्रस्यसात्विकश्शुद्धविग्रहश्चेतिशास्त्रतः।।
प्रवदन्तिविशेषेणमनुयोब्रह्मवादिनः। कदाचिल्लीलयारुद्रःप्रळयार्थस्वभावतः।।
तामसींतनुमाश्रित्यसृष्टिसंहारकोभवेत्। तामसीतनुरित्याहुर्द्वितीयावरणंक्रमात्।।
रुद्रस्सुखस्वरूपत्वात्कथंचित्तासींतनुम्। जगत्सृष्टेःप्रळयकार्यार्थस्मरतिनान्यथा।
आनन्दसुखबोधस्वरूपत्वात्परमार्थतः। विष्णुब्रह्मादिदेवानांवरिष्ठइतिकीर्तितः।।
तस्माद्रुदस्शास्त्रेषु अन्तस्सत्वंत्रहिस्तमः। इतिवेदप्रमाणेनज्ञानिनः ग्रवदन्तिहि।।
अतश्चित्प्रतिबिंबप्रकाशस्यावरणद्वयम्। तनुद्वयस्वरूपेणसूत्रेस्मिन्सन्निरूपितम्।।
एवंसूत्रस्यविधिवत्सामान्यार्थोनिरूपितः नविद्यतेविशेषार्थस्सूत्रस्यास्यमनागपि।।

।।सूत्रम्९।।

। तन्महावेगात्कंचुकतमोपकर्षणंतमसिपूर्ववत्त्र्यशीतिन्ययेन।

।।बोधानन्द वृत्तिः।।

प्रतिबिंबचितेःपूर्वसूत्रेरुद्रत्वमीरितम्। उच्यतेस्मिन्सत्ववेगात्तमश्शक्तयपकर्षणम्।।
तमश्शक्तयपकर्षणबोधकानियथाक्रमम्। पदानिपंचसूत्रेस्मिन्निर्णितानिपदक्रमात्।
तत्रादिमपदात्सत्वहमावेगःप्रदर्शितः। तमःप्रमाणमुक्तंस्याद्द्वतीयपदतस्तथा।।
तृतीयपदतः पश्चात्तमोगुणमुदीरितम्। पूर्वदृष्टान्तमुक्तंस्याच्चतुर्थपदतःक्रमात्।।

तथैवपंचमपदात्स्वतस्सिद्धोनिरूपितः। पदार्थमेवमुक्तवास्यसामान्यार्थोधुनोच्यते।।

।।सामान्यार्थाः।।

अन्योन्याश्रयसंबंधात्सत्वचित्प्रतिबिंबयोः। जातस्सत्वेमहावेगस्तस्मात्तमसिपूर्ववत्।।
त्र्यशीतिकस्वतस्सिद्वन्यायमानानुसारतः। तमस्यभूत्कंचुकप्रमाणाकर्षणमुद्भुतम्।।
एवंसामान्यर्थमुक्तवासुविचार्ययथामति। विशेषार्थोस्यसूत्रस्ययथाशास्त्रंनिरूप्यते।।

।।विशेषार्थः।।

ध्वान्तप्रमाणेकंचुकशब्दस्सूत्रेभिवर्णितः। तस्यकंचुकशब्दस्यनिर्णयार्थसमासत्तः।।
तमप्रमापकविछिंकिंचिदत्रनिरूप्यते। तमप्रमापकविधौसन्तिशास्त्राणिपंचधा।।
तेषुशारिकनाथोक्तध्वान्तविज्ञानभास्करे। तमप्रमापकविधिर्यथोक्तंस्वानुमूतितः
तदेवात्रसमासेनयथाशास्त्रंनिरूप्यते।

।।शारिकानाथः।।

ध्वान्तप्रमापकंयन्त्रंनवोत्तरशतात्मकम्। द्वात्रिंशदंगसंयुक्तंतमोभेदप्रदर्शकम्।।
उक्तंहियन्त्रसर्वखेभरद्वाजेनधीमता। तस्यत्रयोदशांगेनप्रमातुंतमसोभवेत्।।
तस्मादत्रसमासेनतदंगंप्रविविच्यते। यंत्रस्थद्वादशांगस्यपूर्वभागेस्थितेक्रमात्।।
चतुरश्रेययाशास्त्रंवर्तुलंभारवर्जितम्। वितस्तिदशकायांसुदृढंचसुसूक्ष्मकम्।
छायापकर्षणादर्शंषडुत्तरशतात्मकम्। शास्त्रोक्तविधिनासम्यक्स्थापयेत्सुदृढंततः।
चतुरंगुलमायामंषड्वितस्त्युन्नतंतथा। इतरांगैस्समाहृतविद्युत्तंत्र्यादिभिर्युतम्।
स्वमध्यादन्तपर्यन्तंवितस्त्यैकांतरंयथा। रंध्रत्रयेणसंयुक्तंशिलाकाचविनिर्मितम्।
मेरुस्तंभारव्यशंकुतन्मध्येसंस्थापयेद्दृम्। पश्चात्ततीयरंध्रस्यपार्श्वयोरुभयोरपि।
दृढंदशांगुलायामंक्रमात्षष्ट्यंगुलोन्नतम्!। शास्त्रोक्तविधिनादंडमेकंसंधारयेदृढम्।
तयाद्वितीयरंध्रस्यपार्श्वयोरुभरोरपि। क्रमादष्टांगुलायामंपंचाशदंगुलोन्नतम्।
दण्डंसंवारयेत्तद्रत्सुदृढंकाचनिर्मितम्। एवंप्रथमरंध्रस्यपार्श्वयोरुभयोरपि।
चत्वारिंशत्यंगुलोन्नतमायामेषंडंगुलम्। दंडसंयोजयेत्पूर्ववद्दृढंकाचनीर्मितम्।
दंडप्रमाणमुभयोस्समानमपिपार्श्वयोः। किंचिदूर्ध्वंभवेद्दक्षेवामेधस्थात्स्थितिर्यथा।
तथासंधारयेत्तेषुदंडानित्रीण्यथाक्रमम्। पूर्वोक्ततंत्रिभिर्युक्तचक्रीलान्यथाविधि।
दंडानांमूलदेशेसंधारयेत्पार्श्वयोःक्रमात्। पश्चाच्छायापकर्षणदर्पणेशास्त्रतःक्रमात्।
शंकुस्थानाइक्षवामपार्श्वयोरुभयोरपि। त्रिंशत्त्रिशल्लिखेद्रेखादर्पणान्ताबधिक्रमात्।।
अहःप्रमाणघटिकान्दक्षरेखास्तयोःक्रमात्। रात्रिप्रमाणघटिकान्वामरेखास्तथैवहि।।
प्रदर्शनयन्तिसंख्यातःतथाविघटिकान्क्रमात्। तेषुदेर्शयितुंरेखाश्चतुषष्ठिर्विलेखयेत्।
सर्वत्ररेखान्त्यभागेबिन्दूनंकसमन्वितान्। स्फुटंविलेखयेत्तद्वत्तदन्तस्सूक्ष्मतस्तथा।।
पंचाशदंगुलायामंविस्तीर्णतावदेवहि। त्रिंशुद्रेखांचितंपश्चादनुलोमविलोमतः।।
स्वरूपेभानुवद्भसमानंस्वकिरणैस्वतः। प्रभाकरमणिंशुद्धमष्टाशीत्यात्मकंलघु।।
धारयन्तंमध्यभागेआतपोष्णादिभिर्युतम्। प्रभाकरादर्शचक्रंसूर्यप्रतिनिधिंदृढम्।।

मेरोस्तृतीयरंध्रस्थदक्षदण्डान्त्यकेन्द्रके ।
त्रिचक्रकीलकैस्सम्यक्स्थापयेद्भ्राम्यतेयथा ।।
पश्चाद्दिवाकरादर्शवद्रेखाबिन्दुभिर्युतम् । सुधाद्रवशशोषादिदावकैश्चसुसंस्कृतम् ।।
एतत्संस्कारतश्श्वेताभ्रवद्भास्वरमद्भुतम् ।
आंकारेणांशुभिश्चैवचन्द्रमण्डलवत्स्थितम् ।।
भ्राजमानंसप्तपंचाशदुत्तरशतात्मक् । किरणग्राहकमणिंदधानंमध्यकेन्द्रके ।।
पंचचत्वारिंशदंगुलायामंवर्तुलंतथा । षोडशोत्तरद्विशतसंख्याकंसुदृढंलघु ।।
निशाकरादर्शचक्रंचन्द्रप्रतिनिधिंक्रमात् । पूर्ववत्तृतीयरंध्रवामदण्डान्त्यकेन्द्रके ।।
संधारयेकीलकाद्यैस्स्वतस्संचाल्यतेयथा । श्वेतदूर्वाकमलपुष्पक्षाराष्टकमतःपरम् ।।
ताम्रषोडशकेचूळीताम्रषोडशंकतथा । द्वादशस्वर्णलोहेषुहिरण्याष्टकमेवच ।।
गोदन्तीतालषट्कंचसूतपंकमेवच । सूर्यकान्तशिलाषट्कमेतान्संयोज्यभागशः ।।
क्रमान्माधिममूषायांसंपूर्याथयथाविधि ।
कूर्मव्यासटिकामध्येस्थाप्येंगालादिभिःक्रमात् ।।
द्वात्रिंशदुत्तरचतुश्शतकक्ष्योष्णमानतः । गालयित्वायंत्रमुखेतद्रसंपूरयेत्क्रमात् ।।
उष्णापकर्षकंनामलोहंस्यात्कृतकंततः । तेनप्रकल्पितंभानुफलकंमधुवर्णकम् ।।
निशाकरादर्शचक्रादपिन्यूनषडंगुलम् । बिन्दुरेखांकनैर्युक्तंअवटद्वयसंयुतम् ।।
प्रथमावटमध्यस्थपारदेसन्निवेशितम् । चतुष्षष्टयुत्तरशतसंख्याकंभारवर्जितम् ।।
धर्मापहारकमणिंबिन्दुरेखांकनैर्युतम् । दधानंसुदृढसूक्ष्ममेरेरूर्ध्वयथाविधि ।।
क्रमाद्द्वितीयरंध्रस्थदक्षदण्डान्त्यकेन्द्रके ।
त्रिचक्रकीलकैस्सम्यक्स्थापयेद्भ्राम्यतेयथा ।।
मणिसंयोगतःपश्चादवटेनिमिषार्धतः । मणिमन्तरतःकृत्वाघनत्वंयातिसूतकम् ।।
एतन्मणिस्सूर्यकिरणप्रकाशोष्णंस्वशक्तितः । समाकर्षतिवेगेनयथास्वाभिमुखंभवेत् ।।
पश्चात्तदुष्णंवेगेनमण्यावरकपारदम् । गालयत्यतिवेगेनघनीभूतमतःपरम् ।।
यावन्मात्रंगाल्यतिमण्यावरकपारदम् । तावन्मात्रंरसस्स्वस्वरूपमासाद्यकेवलम् ।।
अवटेस्वपुरोभागस्थितेपततिवेगतः । तन्मणिष्षट्त्रिंशतिकसूक्ष्मदर्पणतस्ततः ।।
वीक्ष्यतेयदितत्रत्यबिन्दुरेखांकनदयः । दृश्यन्तेहियथापूर्वतत्तत्संख्यानुसारतः ।।
पारदोष्णंविनिश्चेतुमेतावन्मात्रमित्यतः । एवमुष्णापकर्षकतृणसंदर्शनादपि ।।
पश्चातच्चतुर्दशोत्तरद्विशतेनयथाविधि । तमोगर्भाख्यमणिनायोजितंभारवर्जितम् ।।
त्रिसप्तत्युत्तरशतात्मकंधूम्राकृतिंततः । छायामुखादर्शचक्रंबिन्दुरेखांकनैर्युतम् ।।
मेरोर्द्वितीयरंध्रस्थवामदण्डान्त्यकेन्द्रके ।
निशाकरादर्शचक्रस्याधस्थात्स्थापयेदृढयम् ।।
एतत्सूर्यप्रकाशस्थतमछायापकर्षणम् । कृत्वाविनिश्चोयतंतत्प्रमाणंचांकनादिभिः ।।
पश्चाद्विचत्वारिंशतिकप्रभामणिनायुतम् । भागर्भादर्शवर्गस्थंष्णवत्यात्मकंततः ।।

स्वच्छंप्रभामुखादर्शबिन्दुरेखांकनैर्युतम्। मेरुस्तंभप्रथमरंध्रदक्षदण्डान्त्यकेन्द्रके।।
त्रिचक्रकीलकैस्सम्यक्स्थापयेद्भ्राम्यतेयथा।
किरणोष्णप्रकाशांशंसूर्यस्येतत्स्वभावतः।।
पूर्वोक्तभानुफलकात्समाकृष्यस्वशक्तितः। निश्चीयतेतत्प्रकाशप्रमाणंस्वांकनादिभिः।।
स्तंभनामुखलोहेषुपश्चाद्द्वादशकस्यच। क्रमात्खचराख्यलोहस्याष्टभागांशकंतथा।।
भूचक्रसुरमित्रादिक्षारपंचकमेवच। अयस्कांतस्यचत्वारिषड्भागोरुरुकस्यच।।
एतान्संमेळ्यविधिवत्तत्तद्भागानुसारतः। पश्चाद्भ्रामणिकमूषामुखमध्येप्रपूर्यच।।
पंचषष्ट्युत्तरद्विशतकक्ष्योष्णप्रमाणतः। गालयित्वातिवेगेनयंत्रास्येसंप्रपूरयेत।।
एतद्भवेत्कृतकलोहःप्रकाशस्तंभनाभिदः। तेनप्रकल्पितंचक्रंबिन्दुरेखांकनैर्युतम्।।
नवसंख्याकमणिनावल्लभाख्येनराजितम्। प्रकाशस्तंभनाचक्रंपंचाशीत्यात्मकंलघु।।
मेरुस्तंभप्रथमकेन्द्रवामदण्डान्त्यकेन्द्रके। त्रिचक्रकीलकैस्सम्यक्स्थापयेत्सुदृढंयथा।।
भागर्भदर्पणस्थितकिर्णोष्णप्रकाशकम्।
एतत्स्वशक्तयाबध्नात्यस्पन्दनंस्याद्यथाक्रमम्।।
अथांजनिकदशकंधौम्यद्वादशकंतथा। नीलंजनेषोडशांशंचतुर्विंशांशयाकंरुरोः।।
जंबालिकास्थिदशकंशर्कराष्टकमेवच। चतुर्दशांशंसूतस्यनवांशगैरिकस्यच।।
वराटिकापंकंचतत्तद्भागानुसारतः। एतान्संयोज्यमूषायांसंपूर्यविधिवत्क्रमात्।।
षड्विंशत्युत्तरपंचशतकक्ष्योष्णमानतः। गालियत्वाथयंवास्येसेचयेद्यदिवेगतः।।
छायाप्रभाविभाजकलोहस्स्यात्कृतकस्ततः।
तेनप्रकल्पितंछायाभाविभाजकपट्टिकाम्।।
यावत्प्रमाणंचक्राणांषण्णामुभयपार्श्वयोः। तावत्प्रमाणंसंक्लृप्तांपट्टिकांभारवर्जिताम्।।
मेरुस्तंभप्रथमरंध्राधोभागेयथाविधि। पार्श्वद्वयस्थचक्राणांसंधिस्थानेन्यसेत्ततः।।
सूर्यकांताद्योषधीनांक्षारद्रावकतस्तया।। रक्तसुंडालकृष्णादिगरळद्रावकेनच।।
रविरंजिकशशिकादिलोहद्रावकादपि। रक्तसुंडालकृष्णदिगरलद्रावकेनच।।
दक्षभागंपट्टिकायास्सप्तवारंमुहुर्मुहुः। द्रावकत्रयतःपश्चात्पृथक्पृथग्विलेपयेत्।।
शोषयित्वाततस्तस्मिन्नूषरद्रावकंपुनः। सेचयित्वातदुपरिसुसूक्ष्मंकृष्णसैकतम्।।
विन्यस्यपश्चात्तन्मध्येचित्रवर्णमनोहरम्। त्रिसप्तत्युत्तरशतसंख्याकमतिसुन्दरम्।।
रविंचुबुकमणिंसंधारयेत्सुदृढंयथा। एवंकृत्वापट्टिकायास्संस्कारंदक्षपार्श्वके।।
वामपार्श्वस्यसंस्कारःकथ्यतेथयथाक्रमम्। कृष्णवल्ल्याद्योषधीनांक्षारद्रावकतस्था।।
घनगर्भादिलोहानांत्रयाणांद्रावकादपि। गौरीवीरादिगरळ्द्रावकैश्चयथाक्रमम्।।
मुहुर्मुहुस्सप्तवारंवामभागार्धपट्टिकाम्। लेपयित्वाथसंशोष्यपश्चात्तदुपरिक्रमात्।
दुर्गंधकृष्णधान्यस्यचूर्णंसंदापयेत्ततः। नीलीचूर्णतदुपरिनिक्षिपेत्सप्रमाणतः।।
पश्चात्संसेचयेत्तस्योपरितादद्रावकेनच। तमोपकर्षकमणिंसप्तत्रिंशात्मकंशुचिम्।।
तस्यमध्येयथाशास्त्रंस्थापयेदचलंयथा। पट्टिकादक्षभागस्थमणिःपश्चात्स्वशक्तितः।।

ऊर्ध्वभास्थषट्चक्रैर्मेरोस्सम्यग्विभाजितम् । सूर्यकिरणप्रकाशंसमाकृष्यातिवेगतः ।।
पट्टिकादक्षभागेथयोजयेदचलंक्रमात् । वामपार्श्वस्थमणिरप्येवंवेगात्स्वशक्तितः ।।
सूर्यकिरणप्रकाशस्थितछायापकर्षणम् । कृत्वातद्वामभागस्थपट्टिकायांनियोक्ष्यति ।
एतेनकिरणप्रकाशप्रमाणविनिर्णयः । पट्टिकादक्षिणेपार्श्वेवामपार्श्वेतथैवच ।।
भवत्यंशुप्रकाशस्थछायाप्रमाणनिर्णयः । द्वादशांगुलमायामंद्वाविंशदंगुलोन्नतम् ।।
द्वाविंशदुत्तरशतात्मककाचविनिर्मितम् । पात्रमेकंयथाशास्त्रंस्थापयेत्सुदृढंयथा ।।
छायाप्रभाविभाजकपट्टिकावामपार्श्वके । पश्चात्संपूरयेत्तस्मिन्नंजनक्षारद्रावकम् ।।
कृष्णवर्णकाचमणिमंजनक्षारकल्पितम् । तत्पात्रमूलदेशेथस्थापयेद्रावकान्तरे ।।
पश्चाद्रेखांकनैर्युक्तंत्र्यौळिकादर्शनिर्मितम् । चतुरंगुलमायमंविंशत्यंगुलमुन्नतम् ।।
तस्मिन्षोडशसंस्कारैस्संस्कृतंकृष्णपारदम् । पश्चात्पलत्रयंशुद्धंपूरयेत्सप्रमाणतः ।।
पश्चादंगुलगात्रांत्र्यौळिकलोहविनिर्मिताम् । छायाप्रभाविभाजकपट्टिकादियथाक्रमम् ।।
एकांतन्त्रींसमांहृत्यपात्रस्थद्रावकान्तरे । अंजनक्षारमणिमावृत्यनाळमुखान्तरे ।।
प्रवेशयित्वातत्रत्यपारदेसन्निवेशयेत् ।। मेरोरुमयपार्श्वस्थचक्राणांतदनन्तरम् ।।
बिन्दुसंख्यानुसारेणसूर्याचन्द्रमसोःक्रमात् । यथारेखांकनासंधिर्भवेत्सांकेततस्स्फुटम् ।।
तथाविद्युत्सहायेनभ्रामयेत्सप्रमाणतः । सूर्यस्यप्रथमरेखाकलांसोमकलास्वतः ।।
समाकृष्यस्वभावेनस्वस्मिन्संधार्यतेस्वतः । पश्चात्तद्भानुफलकसोममंडलयोःक्रमात् ।।
भवेत्प्रथमरेखांकनासंधिःपूर्ववद्यया । तथासंभ्रामयेत्सम्यक्तेनचन्द्रमसिस्थितम् ।
वेगात्तत्सूर्यकिरणस्थितछायांयथाक्रमम् । आकृष्यभानुफलकस्स्वस्यप्रथमरेखया ।
तच्छायांधार्यतेसम्यक्क्रमदस्पन्दनंयथा ।
पश्चात्तद्भानुफलकस्थादिरेखांकनामुखम् ।।
अनयोर्मुखयोस्संधिःपरस्परंयथाभवेत् । संभ्रामयेद्यथाविद्युत्कीलसंबंधतःक्रमात् ।।
ततस्तद्भानुफलकस्थितछायांस्वशक्तितः । स्वयंछायामुखादर्शस्समाकृष्यातिवेगतः ।।
यथास्यात्स्तंमनंस्वस्मिन्तथासंधार्यतेक्रमात् । यथाजलंतीरवृक्षछायांसमपकर्षति ।
तथाछायामुखादर्शस्थितछायांस्वभावतः । पूर्वोक्तकाचपात्रस्यद्रवस्समपकर्षति ।।
पश्चात्तत्रस्थितांजनमणिस्तंत्रीमुखान्तरात् । तच्छायामपकृष्याथतमोरूपंप्रकल्प्यंति ।
ततस्त्रयळिकनाळस्थपारदःकृष्णवर्णकः । तंत्रीमुखात्समाकृष्यतत्तमस्वीयतेजसा ।।
समुत्थायत्र्यळिकनाळेयद्यद्रेखांकनान्तरे । स्वस्थानादूर्ध्वमागत्यस्थीयतेतमसासह ।।
तत्तद्रेखांकनैस्सम्यक्प्रमाणंतमसःक्रमात् । निर्णेतुंशक्यतेतस्मात्तदंगोत्रप्रदर्शितः ।।
प्रमाणविधिरप्यत्रसंकेतात्सोच्यतेधुना ।।

।।तमःप्रमापकसंख्या सांकेतनिर्णयः ।।

अळिकंकौळिकंचैवरन्ध्रंमण्डमतःपरम् । बिम्बोकंवीचकमथतामसंरौणिकंकुटम् ।।
स्तंभंशंबरमंछूरंगुच्छकंकुडुपंतया । गुळिकंछेटिकंपद्मंमण्डलंकंचुकंतथा ।।

इत्यादि ।।

पंचविंशच्छतकक्ष्यततोबिन्दुरितीर्यते। तत्पंचकमळीकंस्यात्त्र्यळीकंकौळिकंभवेत्।।
रंध्रंतत्पंचकंविन्द्यान्मण्डंतस्याष्टकंविदुः। तन्मण्डदशकंबिम्बोकमितिप्रोच्यतेतथा।।
तद्विंशतिर्वीचकंस्यात्तामसंतद्दशस्तथा। तदष्टकंरौणिकंस्यात्कुटंतद्द्वादशेतिच।।
ततस्तद्दशकंस्तंभमितिसंकीर्त्यतेक्रमात्। तत्स्तंभपंचदशकंशंबरंस्यात्तर्थवहि।।
शंबरस्याष्टदशकंमंछूरमितिकीर्तितम्। तदष्टदशकंतद्वद्गुच्छमित्यभिधीयते।।
कुडुपंतद्विंशतिस्स्यात्तदष्टाविंशतिक्रमात्।
प्रोच्यतेगुळिकमितितत्त्रिशच्छेटिकंस्मृतम्।।
छेटिकस्यत्रयोविंशत्पद्ममित्यभिधीयते। तत्पद्मद्वात्रिंशतिर्मण्डलमित्युच्यतेतथा।।
तन्मण्डलाष्टविंशत्कंचुकमित्यभिधीयते।।

इत्यादि।।

एवमुक्त्वाकंचुकप्रमाणंतद्वद्यथाविधि। त्र्यशीतिकस्वतस्सिद्वन्यायमत्रनिरूप्यते।।

।।स्वतस्सिद्धन्यायसूत्रम् ८३।।

यस्मिन्नयूनाधिकत्वं शक्तिद्वयस्य तस्मिन्नधि कान्यून ग्रहमं सहजम्।।

।।विश्वंभरवृत्तिः।।

योवाकोवाभवेद्वस्तुतस्मिन्शक्तिद्वयंयदा। प्राप्नोत्यन्योन्याश्रयत्वंन्यूनाधिकस्वभावतः।।
तयोरधिकशक्त्यातन्न्यूनशक्त्यपकर्षणम्।
सहजंस्यात्तदातस्मिन्निति‌न्यायनिरूपणम्र्।।
एवंनवमसूत्रार्थस्सप्रमाणाद्यथाक्रमम्। अत्यन्तसंग्रहादत्रयथामतिनिरूपितः।।

।।सूत्रम् १०।।

।।ध्वान्तद्वयसंयोगेचित्सान्निध्यात्त्रैविध्यं तमसः।।

।।बोधानन्द वृत्तिः।।

पूर्वसूत्रेकंचुकतमोत्पत्तिस्सिन्निरूपितः। तथाध्वान्तत्रयोत्पत्तिस्सूत्रेस्मिन्प्रतिपाद्यते।।
ध्वान्तवैविध्यबोधकपदान्यस्मिन्चतुःक्रमात्। ध्वान्तद्वयसमायोगस्तत्रादिमपदात्स्मृतः।।
द्वितीयपदतस्तद्वच्चित्सान्निध्योनिरूपितः तृतीयपदतोध्वान्तत्रैविध्यंसन्निरूपितम्।।
ध्वान्तस्वरूपमुक्तंस्याच्चतुर्थापदतस्तथा। पदार्थमेवंकथितंसंग्रहेणयथाक्रमम्।।
सामान्यार्थोस्यसूत्रस्यइदानींसन्निरूप्यते।।

।।सामान्यार्थः।।

कंयुकावरणभेदाद्वैविध्यंमसःक्रमात्। यदुक्तंशास्त्रतःपूर्वतयोरावरणंतमः।।
प्रोक्तंप्राथमिकमितिद्वितीयमितिकंचुकम्। तयोरावरणध्वान्तंसत्वसंबन्धतःक्रमात्।।
पुरुषमितितत्वज्ञैश्शस्त्रतःप्रतिपादितम्। अपरंकंचुकतमोध्वान्तसंबंधतस्तथा।।

स्त्रीस्वरूपमितिप्रोक्तंतत्वविज्ञानपारदैः। अनयोर्मेळनमभूच्चित्सान्निध्यबलात्ततः।।
तस्मात्त्रिधातत्तमोभूत्त्रिगुणाकारतःक्रमात्। एवमुक्तंसंग्रहेणसामान्यार्थोयथामति।।
विशेषार्थोद्यसूत्रस्यंसंग्रहेणमिरूप्यते।।

।।विशेषार्थः।।

त्रैविध्यमितियत्प्रोक्तंसूत्रेस्मिन्तमसःक्रसात्। तदेवशास्त्रतस्सम्यक्संक्षेपादत्रवर्ण्यते।।

।।तदुक्तंध्वान्तविज्ञनभास्करे।।

चितिचैत्यस्पन्दनेनसृष्टयादावेकमेवहि। तमःप्रादुरभूद्वेगात्तमस्पृष्टैववकेव्लम्।।
तमेवमूलप्रकृतिरित्याहुर्ज्ञानवित्तमाः। तमआसीदितिप्राहतमेवहिसनातनी।।
पश्चात्तस्मिन्चित्प्रकाशस्स्वभावात्प्रतिबिंबितः।
तत्सान्निध्यबलान्मूलप्रकृत्यामतिवेगतः।।
अन्धंतमोगूढंतमस्तमश्चेतियथाक्रमम्। तमांसित्रीण्यजायन्तचित्प्रभामिश्रितानिहि।।
त्रिगुणाइतितान्येवप्रवदंन्तिमनीषिणः। सत्वंरजस्तमइतिगुणाःप्रकृतिसंभवाः।।
तमःप्रभामिश्रितंयत्तेषुसत्वमितीर्यते। गूढंतमइतिप्राहुस्तमेवज्ञानवित्तमाः।।
सत्वेतमोमिश्रितंयत्तद्रजोगुणइत्यभूत्। तमेवपूर्वोक्ततमइतिप्राहुर्मनीषिणः।।
तमोगुणइतिप्राहुःप्रकतिध्वान्तमिश्रितम्। तमेवान्धंतमइतिशास्त्रतःप्रतिपादितम्।।
यत्सत्वगुणइत्युक्ततद्विद्येतिप्रकीर्तितम्। यद्रजोगुणइत्युक्तंतदविद्येतिनिर्णितम्।।
विक्षेपावरणशक्तिस्वरूपस्स्यात्तमोगुणः। एवंप्रकृत्यांतमसस्त्रैविध्यमभवत्क्रमात्।।
प्रतिबिंबचित्प्रकाशसान्निध्यादेवकेलवम्। एवंप्रकृत्यांतमसस्त्रैविध्यंसूत्रतस्स्मृतम्।।
एवंदशमसूत्रार्थस्संग्रहेणनिरूपितः।।

।।सूत्रम् ११।।

।।तदावरणादव्यक्तत्वंचितेः।।

।।बोधानन्द वृत्तिः।।

उक्तंध्वान्तत्रयोत्पत्तिःप्रकृत्यांपूर्वसूत्रतः। उच्यतेव्यक्तत्वमस्मिन्तदावरणतश्चितेः।।
अव्यक्तबोधकपदान्यस्मिन्त्रीणियथाक्रमम्। पदच्छेदनतस्सम्यङ्निर्णितानिप्रमाणतः।।
तत्रादिमपदाध्वान्तावरणंसमुदीरितम्। द्वितीयपदतोव्यक्तस्वरूपस्सन्निरूपितः।।
प्रतिबिंबचित्स्वरूपस्तृतीयपदतस्स्मृतः। पदार्थमेवमुक्त्वास्यसामान्यार्थोनिरूप्यते।।

।।सामान्यार्थः।।

पूर्वोक्तत्रिविधध्वान्तावरणादेवकेवलम्। प्रतिबिंबचितेस्सम्यगव्यक्तत्वमभूत्क्रमात्।।
एवमुक्तंसंग्रहेणसामान्यर्थोयथामति। विशेषार्थोद्यसूत्रस्ययथाशास्त्रंनिरूप्यते।।

।।विशेषार्थः।।

।।तदुक्तंसृष्टिविलासे।।

निर्विकारस्वरूपत्वान्निर्गुणत्वात्तथैवहि। सर्वावभासकत्वाच्चनित्यत्वात्परमात्मनः।।

अव्यक्तत्वंतथाध्वान्तावरणंवायथाक्रमम्। कंथनुघटतेवक्तुमितिचेत्सन्निरूप्यते।।
श्रुत्यामात्मप्रकाशस्यविवृतत्वंयदीरितम्। तन्नसिध्यत्यद्वयत्वाद्विनावस्त्वन्तरंस्वतः।।
सत्वंरजस्तमोगुणसाम्यरूपामहत्तरा। तमारूपाप्रभामिश्रकृष्णदर्पणवत्स्थिता।।
आत्मशक्तिस्वभावादेवेकांशेपरमात्मनः। तमस्पृष्टैववाविरभूत्पद्मपत्रमिवांभसा।।
यदंशेप्रकृतिर्जातातदंश परमात्मनः। प्रतिबिंबत्वमभजत्तत्प्रकृत्यांस्वरूपतः।।
प्रतिबिंबप्रकाशप्रवेशादेवगुणास्त्रयः। परस्परंविभिन्नास्युस्तत्प्रकाशेनसंयुताः।।
शुक्लवर्णभवेत्सत्वं रक्तवर्णभवेद्रजः। कृष्णवर्णभवेत्तेषुतमइत्युच्यतेबुधैः।।
एवंवर्णत्रयोपेतंतमःप्रकृतिरुच्यते। तेष्वात्मप्रतिबिंबस्वरूपंगूढंतमःक्रमात्।
आदौसमावृणोत्पश्चादासमंतात्ततःपरम्। अवृणोत्सामान्यतमस्ततस्तदुपरिक्रमात्।।
समावृणोदन्धंतमस्तथैवस्वीयतेजसा। ध्वान्तत्रयावरणमेवंउपर्युपर्यथाक्रमम्।।
सत्वस्थप्रतिबिंबस्यस्वसान्निध्यबलादभूत्। तदावरणतोव्यक्तत्वंसरुद्रःप्रपेदिरे।।
इत्येकादशसूत्रार्थस्संग्रहेणनिरूपितः।।

इत्यादि।।

।।विशेषार्थः।।

सूत्रपंचस्वतस्सिध्दन्यायमित्यदुदीरितम्। तत्संगृह्यात्रविविद्यथाशास्त्रंनिरूप्यते।।

।।स्वतस्सिद्धन्यायसूत्रम् ५।।

।।स्वस्यस्वव्यतिरिक्ताभावात्स्वत्वन्न।।

।।विश्वंभर वृत्तिः।।

स्वयमेवस्वस्यस्वत्वंद्रष्ट्टश्रोत्रदिभिर्विना। वक्तुंनघटतेलोके अद्वयस्यैकवस्तुनः।।
द्वितीयवस्त्वपेक्षातःसंभवत्येवनान्यथा। देवदत्तस्स्वयंयातीत्यत्रद्रष्टारमन्तरा।।
वक्तुंनसंभवेद्यस्मात्तस्मदिन्नरस्वभावतः। देवदत्तेतरोयज्ञदत्तस्स्भांतव्यमेवहि।।
तस्मात्स्वस्यस्वातिरिक्तवस्त्वभावात्कदापिवा।
वक्तुंनप्रभवेत्स्वत्वमितिन्यायनिरूपणम्।।

।।सूत्रम् १२।।

।।जन्यत्वादावरणत्वं जडत्वादप्रकाशत्वंचतमसः।।

।।बोधानन्द वृत्तिः।।

पूर्वसूत्रेचितेर्ध्वान्तावरणंसन्निरूपितम्। तमसोस्मिन्नावरणाव्यक्तकारणमुच्यते।।
तत्कारणप्रबोधकपदान्यस्मिन्यथाक्रमम्। पंचसम्यङ्निर्णितानितेषामर्थोभिधीयते।।
अन्धकारस्यजन्यत्वंतत्रादिमपदात्स्मृतम्। द्वितीयपदतस्तस्थावरकत्वंनिरूपितम्।।
तृतीयपदतस्तद्वज्जडत्वंसन्निरूपितं। एवंतस्याप्रकाशत्वंचतुर्थपदतस्स्मृतम्।।
तथैवपंचमपदात्तमोरूपंप्रदर्शितम। समुच्चयनिरूपार्थचकारोत्रनिरूपितः।।

पदार्थमेवमुक्त्वास्यासामान्यार्थोधुनोच्यते ।।

।।सामान्यार्थः।।

सच्चिदानन्दरूपस्यनित्यस्यपरमात्मनः। प्रकाशस्ववरूपत्वात्तस्याजन्यत्वमीरितम् ।।
अग्नीषोमात्मिकाशक्तिस्तस्मिन्नेकांशतःक्रमात्। तमोरूपेणसंजाताजलेबुद्बुदवत्स्वतः ।।
अतोजडत्वंजन्यत्वंप्रकृतेस्सहजंस्मृतम्। स्वयंप्रकाशमानत्वादजन्यत्वद्विशेषतः ।।
चित्प्रकाशस्वभावेनबाह्याभ्यन्तरतःक्रमात्। प्रकाश्यतेस्वेतरांश्चचेतनाचेतनात्मकान् ।।
तमस्त्वभानरूपत्वाज्जन्यत्वाच्चस्वभावतः। जडत्वात्स्वेतरान्सर्वान्प्रकाशयितुमक्षमः ।।
अतस्तान्चेतनाचेतनाकारान्जगतिस्यितान्। व्यक्तानपिस्वावरणात्समांछाद्यविशेषतः ।।
अव्यक्तत्वंकल्पयतिस्वखरूपान्धकारतः। एषएवास्यतमसःकृत्यमित्यभिधीयते ।।
तस्मात्स्वयंप्रकाशोपिपरमात्मानिरंजनः। अन्धकारस्वावरणात्तमाच्छाद्यस्वभावतः ।।
स्वयंव्यक्तस्वरूपोप्यव्यक्तत्वंचप्रकल्पयत्। एतेनान्तश्चित्प्रकाशोबहिर्गूढंतमस्स्मृतः ।।
अतोव्यक्तमितिप्राहुःपरमात्मानमव्ययम्। अव्यक्तोनामव्याकृतनामरूपादवस्थितिः ।।
स्वयंप्रकाशमानत्वाद्भासयन्तत्तमस्स्वयम्।
आत्मैवासंगभावेनतमस्पृष्ट्वास्वयंक्रमात् ।।
तदावरणमध्येव्यक्तस्वरूपात्मनास्थितिः। इतिद्वादशसूत्रार्थस्संग्रहेणनिरूपितः ।।

।।सूत्रम् १३।।

।।ध्वान्तोपाधिलयात्तत्रत्यप्रतिबिंबयोरेकत्वं पूर्वस्मिन्।।

।।बोधानन्द वृत्तिः।।

प्रतिबिंबचितेःपूर्वसूत्रेव्यक्तत्वकारणम्। निरूपितमभूदस्मिन्सूत्रेतद्वद्यथाक्रमम् ।।
रजस्तमध्वान्तलयाद्विंबैकत्वंप्रचक्षते। प्रतिबिंबैक्यबोधकपदान्यस्मिन्यथाक्रमम् ।।
चत्वारिनिर्णितानिस्युःपदच्छेदनतस्स्पुटम्। तत्रादिमपदाध्वान्तद्वयोपाधिलयस्स्मृतः ।।
तन्निष्ठात्मप्रतिबिंबद्वयमुक्तंद्वितीयतः। तृतीयपदतस्तद्वत्तयोररैक्यंप्रदर्शितम् ।।
सत्वाभासोव्यक्तगतश्चतुर्थपदस्स्मृतः। पदार्थमेवमुक्त्वाथसामान्यार्थोनिरूप्यते ।।

।।सामान्यार्थः।।

त्वंरजस्तमोरूपगुणास्तिस्वस्वभावतः। उपाधित्रयमित्युक्तंप्रतिबिंबात्मनःक्रमात् ।।
तेषुसत्वोपाधिगतोरुद्रइत्यभिधीयते। ब्रह्मारजोपाधिगतस्तमोपाधिगतोहरिः ।।
उपाधित्रयसंयुक्तह्येतेस्युर्गुणमूर्तयः। रुद्रद्वितीयावरणेसत्वचित्प्रतिबिंबयोः ।।
सान्निध्यबलतोत्यन्तवेगस्समभवत्स्वतः। तेनापकर्षितेध्वान्तेतमोरजस्वरूपके ।।
रुपद्वितीयावरणेविलयंप्राप्तुःक्रमात्। ध्वान्तद्वयोपाधिलयात्तत्रत्यप्रतिबिंबयोः ।।
पूर्वोक्तसत्वप्रतिबिंबस्वरूपेस्वभावतः। अविनाभावतस्सम्यगेकत्वमभवत्क्रमात् ।।
एवंक्रमात्त्रयोदशसूत्रार्थस्संप्रदायतः। यथाशास्त्रंसमालोच्यसंग्रहेणनिरूपितः ।।

।।सूत्रम् १४।।

।।तेजोधिकोऽतः।।

।।बोधानन्द वृत्तिः।।

प्रतिबिंबद्वयलयः पूर्वसूत्रेनिरूपितः। अस्मिन्तेजोधिकस्सत्वप्रतिबिंबस्यकीर्त्यते।।
सूत्रेपदद्वयंप्रोक्तंतेजोधिकप्रबोधकम्। तत्रादिमपदात्तेजसोधिकत्वंप्रदर्शितम्।।
द्वितीयपदतस्तस्यकारणंसन्निरूपितम्। पदार्थमेवंकथितंसामान्यार्थोधुनोच्यते।।

।।सामान्यार्थः।।

प्रतिबिंबद्वयलयात्सत्वस्थप्रतिबिंबके। यतोभूदविनाभावादतस्तस्मिन्स्वभावतः।।
अभूत्तेजोधिकःपूर्वतेजसोप्यधिकंपुनः। एवमुक्तंचतुर्दशसूत्रार्थस्संप्रदायतः।।

।।सूत्रम्१५।।

।।तस्मात्भ्रमणमव्यक्तचितश्चत्वारिंश न्यायेन।।

प्रतिबिंबचितःतूर्वसूत्रेतेजोधिकस्स्मृतः। भ्रमणत्वंतैथवास्मिन्सूत्रेतस्यप्रचक्षते।।
भ्रमप्रबोधकपदान्यस्मिन्सूत्रेयथाक्रमम्। चत्वरिनिर्णितानिस्युःपदच्छेदनतःक्रमात्।।
तत्रादिमपदात्कारणत्वंसम्यक्प्रदर्शितम्। द्वितीयपदतस्तद्वद्भमणत्वंनिरूपितम्।।
तथाव्यक्तचित्स्वरूपंतृतीयपदतस्स्मृतम्। चत्वागिंशन्न्यायविधिश्चतुर्थपदतस्स्मृतम्।।
पदार्थमेवमुक्त्वाथसंग्रहेणयथाक्रमम्। सामान्यार्थोस्यसूत्रस्ययथाशास्त्रांनिरूप्यते।।

।।सामान्यार्थः।।

अव्यक्तचित्स्वरूपस्यप्रकाशाधिक्यकारणात्।
चत्वारिंशत्स्वतस्सिद्धन्यायसूत्रानुसारतः।
अमणत्वमभूत्सम्यक्स्वभावादेवकेवलम्। एवमुक्तंपंचदशसूत्रार्थस्संप्रदायतः।।
भ्रएवंसामान्यार्थमुक्त्वासंग्रहेणयथामति। इदानींतद्विशेषार्थःकिंचिदत्रनिरूप्यते।।

।।विशेषार्थः।।

यच्चत्वारिंशतिन्यायइतिसूत्रेनिरूपितः। तदत्रविशदीकृत्ययाशास्त्रंनिरूप्यते।।

।।स्वतस्सिद्धन्यायसूत्रम् २४।।

।।शक्तिद्वयसंयोगेपूर्वत्यांभ्रमणंसहजम्।।

।।विश्वंभरवृत्ति।।

सजातीयविजातीयप्रभेदेनयथाक्रमम्। द्विविधाश्शक्तयस्सर्वाइतिप्राहुर्मनीषिणः।।
सजातीयास्तासुभिन्नजातीयावापरस्परम्।
यदिस्युर्मिळितास्सम्यक्तत्त्ज्जातीयशक्तिषु।।
परशक्त्यापूर्वशक्तिःक्षुभिताभवतिक्रमात्। पूर्वस्यांभ्रमणंतेनसहजंस्यादितीरितम्।।

।।इत्यादि।।

।।सूत्रम्१६।।

।।प्रतिबिंबेभ्रमणत्वेसत्यप्यधिकप्रकाशकत्वमसिद्धं बिंबप्रतिबिंबयो रेकत्वात्सप्ताशीतिन्यायेन।।

।।बोधानन्द वृत्तिः।।

बिंबप्रतिबिंबभेदात्परमात्माद्वयस्स्वयम्।
उपाधिनिरूपाधिभ्यांद्वैविध्यमभजत्क्रमात्।।१।।
उपाधिर्नामात्ममायाशक्तिरित्यभिधीयते। निरुपाधिर्नाममायाशक्तयभावइतीर्यते।।२।।
मायाधिष्ठावभूतात्मामायाशक्तिविवर्जितः। बिंबइत्युच्युतेवेदशास्त्रेषुज्ञानवित्तमैः।।३।।
यदासएवस्वशक्त्याबिंबरूपोनिरंजनः। बिंबलक्षणहीनोपिबिंबवत्स्वयमेवहि।।४।।
प्रकृत्यांप्रतिफलतिसमुद्रेचन्द्रमाइव। तदातत्प्रतिफलितबिंबस्यवस्वभावतः।।५।।
शास्त्रेषुज्ञानिभिस्सम्यक्प्रतिबिंबइतीर्यते।
उपाधिनिरुपाधिभ्यामेकस्यैवपरात्मनः।।६।।
आत्मसान्निध्यमात्रेणतन्भायाभ्रान्तिमात्रतः।
बिंबत्वंप्रतिबिंबत्वंचेतिद्वेधास्वशक्तितः।।७।।
स्वस्मिन्नेवस्वभावेनकल्पयामाससत्वरम्। आत्मवत्प्रतिबिंबत्वंबिंबत्वंचतथैवहि।।८।।
तत्प्रकाशस्यापिभवेदितिचेत्तन्नसंभवेत्। प्रकाशस्स्वस्वरूपत्वादात्मनःपरमार्थतः।।९।।
तमात्मानंविनातस्यपृथग्रूपंयतोनहि। ततस्स्वप्रतिबिंबत्वंतस्यचित्प्रतिबिंबवत्।।१०।।
उपाधिनासंवृतोपिपृथगाप्तुंनशक्यते। अतएवभ्रामणत्वसंसिद्धेसत्यपिक्रमात्।।११।।
प्रतिबिंबप्रकाशाधिकत्वंनस्यात्स्वभावतः। नन्वात्मापरमानन्दस्वरूपइनिभूरिशः।।१२।।
प्रवदन्तिस्ववाक्यैश्वश्रुतयःपरमार्थतः। तस्मात्प्रकाशरूपमितिवक्तुकथंभवेत्।।१३।।
आनन्दोवाप्रकाशोवानिर्विकारेपरात्मनि। कथंभवेत्स्वस्वरूपमौपचारिकमेवतत्।।१४।।
मधुरस्ययथारूपंलोकेमधुरितीर्यते। तथैवचात्मनोरूपंप्रकाशइतिसाश्रुतिः।।१५।।
अनुग्रहार्थंब्रह्माभ्यासपराणामुवाचहि। स्वतस्वरूपाभावत्वात्प्रकाशप्रतिबिंबयोः।।१६।।
तावुभावात्ममात्रेणवर्तेतेपरमात्मनि। एकत्वादात्ममात्रेणचिब्दिंबप्रतिबिंबयोः।।१७।।
तथैवतत्प्रकाशस्याप्येकत्वाच्चस्वरूपतः।
प्रतिबिंबेप्रकाशाधिकत्वंनैवभवेत्स्वतः।।१८।।
अविनाभावरूपत्वात्प्रकाशपरमात्मनोः। आत्मवत्प्रतिबिंबत्वंप्रकाशस्यांप्युपाधिना१९।।
संभवत्येवतस्मात्तत्प्रतिबिंबेस्वभावतः। भवितव्यमेवप्रकाशाधिकत्वमपिक्रमात्।।२०।।
तस्मत्प्रकाशाधिकत्वंप्रतिबिंबेनिरूपितम्।
यत्प्रकांशाधिकत्वमसिद्धमित्यभिवार्णितम्।।२१।।
तदसिद्धमेवभवत्युपाधिग्रहणात्स्वतः। इतिचेन्न्यायसूत्रस्यविरोधोभवतिक्रमात्।।२२।।

अवएवप्रकाशाधिकत्वासिद्धत्वमेवहि। एतत्सूत्रेणविधिवत्सिद्धान्तत्वेनवर्णितम्।।२३।।
एवमुक्त्वासमासेनसामान्यार्थोयथाक्रमम्। विशेषर्थोद्यसस्ययथामतिनिरूप्यते।।२४।।

।।विशेषार्थः।।

सप्ताशीतिन्यायमितिसूत्रेयत्प्रतिपादितम्। तद्विविच्ययशांसंग्रहात्संप्रचक्षते।।२५।।

।।स्वतस्सिद्धन्यायसूत्रम्८७।।

।।स्वप्रकाशात्स्वस्यप्रतिबिंबत्वसंभवत्वेपितस्यप्रकाशाधिक्यसंभवोनस्या त्सूर्यप्रतिबिंबवत्।।

।।विश्वंभर वृतिः।।

स्वयंप्रकाशमानत्वंसूर्यस्यसहजंस्मृतम्।
तस्मात्तस्यस्वप्रकाशादेवसम्यग्जलादिषु।।२६।।
आत्मवत्प्रतिबिंबत्वंस्वभावाद्भवतिक्रमात्।
तस्मात्सूर्यस्यरूपाधिकत्वंस्वप्रतिबिंबतः।।२७।।
स्वसन्निधानमात्रेणस्वोपाधौकल्पितंभवेत्। उपाधिमात्रमेवात्रकारणंनस्वभावतः।।२८।।
स्वस्वरूपाधिकत्वंस्वप्रतिबिंबाद्यथाभवेत्।
तथैवस्वप्रकाशाधिकत्वंस्यादितिचेन्नतत्।।२६।।
रूपवत्स्वप्रकाशधिकत्वंनस्यात्स्वभावतः।
इतिसप्ताशीतितमन्यायसूत्रविनिर्णयः।।३०।।
एवंषोडशसूत्रार्थस्संग्रहेणनिरूपितः।।

।।सूत्रम् १७।।

।।तदधिकत्वमुपाधिभेदाद्रंजिकादित्यवत्।।

।।बोधानन्द वृत्तिः।।

पूर्वसूत्रोप्रकाशाधिक्यमसिद्धमितीरितम्।
अस्मिन्प्रकाशाधिकत्वकारणंसन्निरूप्यते।।१६।।
प्रतिबिंबेप्रकाशाधिकत्वकारणनिर्णये। सूत्रेपदानिचत्वारिनिर्णितानियथाक्रमम्।।१७।।
तत्रादिमपदात्सम्यक्प्रकाशःपरिकीर्तितः।
द्वितीयपदतस्तस्याधिकत्वंसंप्रदर्शितम्।।१८।।
तृतीयपदतोपाधिकारणंसूचितंतथा।। चतुर्थपदतस्तस्यदृष्टान्तस्सन्निदर्शितः।।१६।।
पदानामेवमुक्त्वार्थस्संप्रदायानुसारतः। सामान्यार्थोद्यसूत्रस्यसंग्रहात्संप्रचक्षते।।२०।।

।।सामान्यार्थः।।

पूर्वसूत्रेप्रकाशस्यात्मस्वरूपत्वकारणात्।
आत्मनःप्रतिबिंबेप्रकाशाधिक्यंनिषेधितम्।।१।।

तन्निराकृत्यसूत्रेस्मिन्प्रतिबिंबेपरात्मनः। उक्तप्रकाशाधिकत्वमेवदृढयतिक्रमात्।।२।।
आदित्यप्रतिबिंबस्ययथारंजिकदर्पणे। स्वप्रकाशाधिकत्वंस्यात्तयैवोपाधिभेदतः।।३।।
उक्तप्रकाशाधिकत्वंप्रतिबिंबेपरात्मनः। भवत्येवस्वभावेनपूर्वोक्तात्मैक्यकारणात्।।४।।

।।तदुक्तंसौदामिनी कलायाम।।

सजातीयप्रकाशाव भासितद्वयवस्तुनोः। प्रकाशाधिकमेकस्मिन्नपरेल्पप्रकाशता।।५।।
स्थित्वान्योन्याभिमुखत्वंभवेद्यदातयोःक्रमात्।
तदाबृहत्प्रकाशोल्पप्रकाशमपकर्षति।।६।।
अल्पप्रकाशाधिष्ठानवस्तुस्वंस्मिन्ततःक्रमात्।
स्वप्रकाशंसमाकृष्यधारयत्यचलंयथा।।७।।
स्थलसंकोचहेतुत्वादल्पप्रकाशवस्तुनि।
व्याप्तुंसंपूर्णतोनस्याब्दृहत्प्रकाशवस्तुनः।।८।।
अतःपराङ्मुखोभूत्वास्वस्थानंप्रतिवेगतः।
तिर्यग्गच्छत्यूर्ध्वमुखंतत्प्रकाशोस्वभावतः।।९।।
पश्चादल्पप्रकाशस्तत्प्रकाशस्वीपशक्तितः।
सजातीयर्स्वभाव त्वात्समाकर्षतिवेगतः।।१०।।
तथापितंसमाहेर्तुनशशाकस्वशक्तितः।
तस्मात्तत्प्रतिबिंबस्वतेजसातत्स्वरूपवत्।।११।।
समादायातिवेगेनस्वस्थानेसन्नियोजयेत्।
प्रकाशद्वयमध्येतत्प्रतिबिंबस्ततस्स्वयम्।।१२।।
वर्ततेस्वस्वरूपेणबृहत्प्रकाशबिंबवत्।
पश्चात्स्वकिरणैरतत्प्रकाशौद्वावपिचक्रमात्।।१३।।
व्याप्यतस्यान्तर्बहिश्चप्रकाशयतितेजसा।
तेनतत्प्रतिबिंबेपूर्वप्रकाशादपिक्रमात्।।१४।।
भवेत्प्रकाशाधिकत्वंबृहत्प्रकाशबिंबवत्।।

।।इत्यादि।।

।।सृष्टिविलासेषि।।

प्रकाशद्वयसंयोग त्तदधिष्ठानवस्तुनोः। प्रभवेत्प्रतिबिंबत्वमुभयत्रपरस्परम्।।२१।।
अतःप्रकाशाधिकत्वंप्रतिबिंबेभवेत्स्वतः।।२२।।

।।इत्यादि।।

।।ज्योतिर्विलासेप्येवमेवोक्तम्।।

प्रकाशद्वयसंयोगेतदधिष्ठानवस्तुनोःपरस्पर मुभयत्रप्रतिबिंबोभवति। प्रकाशोद्विधा।।
विशेषसामान्यभेदात्। तत्रविशेषप्रकाश विशिष्टादर्पणादयः।
विशेषोनाम, दहन, पचन न्वलनभानोष्णवेगविशिष्टप्रकाशो विशेषप्रकाशः।

सामान्योनाम, एतग्द्गुणरहितप्रकाशस्सामान्यः। विशेषोपिद्विधा, सावरणो, निरावरणश्चेति।
तत्रसावरणोग्न्यादीनाम्।
निरावरणस्त्वात्मसूर्यादीनाम्। अन्योःपरस्परंप्रतिबिंबत्वंनास्ति।
विजातीयप्रकाशत्वात्। सजातीयप्रकाशविशिष्टवस्तूनामप्येवमेवप्रतिबिंबाभावः।
समान्त्वात्। सामान्योपिद्विधा, बाह्ययाभ्यान्तरभेदात्।
तत्रबाह्यप्रकाशोदर्पणादीनाम् आभ्यन्तरप्रकाशःपर्वतादीनाम्।
उभयत्रविशेषप्रकाशसद्भावेपिपर्वतादिषुदर्पणादीनांप्रतिबिंबत्वंनास्ति।
आकर्षणाशक्त्यभावात्। पवर्तादीनां दर्पणादिषु प्रतिबिंबोभवति।
आकर्षणाशक्तिसद्भावात्। एवमेवविशेषप्रकाश विशिष्टवस्तूनांसामान्यप्रकाश विशिष्टवस्तुषुप्रतिबिंबोभवति।
प्रकाशस्यत्यूनाधिकप्रभेदात् तद्यथेतिचेत्। प्रकृत्यामात्मवत्।।
इत्यादिशास्त्रप्रमाणैः प्रतिबिंबात्मनिक्रमात्।
प्रकाशाधिकसंसिद्धिर्भवेद्यस्मात्स्वभावतः।।
तस्मात्प्रकाशाधिकत्वमसिद्धमितियत्स्मृतसू।
तत्प्रमाणानुभूत्योर्विरुद्धत्वात्सन्निराकृतम्।।

।।रंजिकदर्पणमुक्तं दर्पणप्रकरणे।।

स्फाटि्कपारदसैकतसज्जीकारोधुंडिकशल्यविरंचिः।
कंदरकर्बुरमाक्षिकवज्रोमौक्तिकदन्त सुरंजिकनागः।
चांद्रिकसौरिकभामुखरौद्रोगारुडगैरिकफेनगुहारिः।।
उडुषोडशद्वात्रिंशत्पंचद्वाविंशतिमुनिवसुरुद्राग्निः।
ऋतुबाणार्कार्ष्टांदशवेदास्सप्तदशानल ऋतुपंचदश।
एवंग्रहगुणसायकपंचविभागांशानाहृत्यविधानात्।
सम्यक्संशोध्यततस्तुलयासंतोल्यसंप्रदायेना।
संपूर्यगारुडास्यमुखमूषामध्येयथोक्तविधिनाच।
कूर्मव्यासटिकायांमध्येनिक्षिप्येंगालपाषाणमृत्पिंडैः।
संगाल्यवेगतोर्द्विमुखीभस्त्रात्त्रिशतकक्ष्योष्णमानेन।
आदर्शकयंत्रगर्भमुख बिलमध्येसंपूरयेच्छिनैश्शनैः पश्चात्।
एवंकृतेतिशुद्धोनिर्मलरूपोमहाप्रकाशयुतः।
पंचसहस्रज्योतिसमानद्युतियुतोभवतिरंजिकादर्शः।।

।।इत्यादि।।

।।सूत्रम १८।।

।।तस्मात्तद्द्विगुणतमसोपकर्षणंपूर्ववत्।।

।।बोधानन्द वृत्तिः।।

भानाधिक्यंपूर्वसूत्रात्प्रतिबिंबेदृढीकृतम्।
तस्मादस्मिन्तत्प्रकाशाद्द्विगुणाधिकतःक्रमात्।।१।
ध्वांतापकर्षणंसम्यग्यथाशास्त्रंप्रकीर्त्यते।
तमोपकर्षणप्रबोधकानित्रीण्यथाक्रमम्।।२।।
पदानिनिर्णितान्यस्मिन्संप्रदायानुसारतः।
उक्तप्रकाशाधिकत्वंतत्रादिमपदात्स्कृतम्।।३।।
द्वितीयपदतस्तध्वांतापकर्षणमीरितम्। तृतीयपदतःपूर्वदृष्टान्तस्सन्निदर्शितः।।४।।
पदार्थमेवमुक्त्वास्यसामान्यार्थोधुनोच्यते।।

।।सामान्यार्थः।।

प्रतिबिंबेप्रकाशाधिकत्वहेतोस्स्वभावतः। तत्प्रकाशाद्द्विगुणिततमसस्तेनकर्षणम्।।
क्रमान्नवमसूत्रोक्तन्यायमानानुसारतः। अभूत्पश्चात्तत्प्रकाशमावृणोत्ततमःक्रमात्।।
स्वतस्सिद्धन्यायमानंनवमेसंप्रदर्शितम्। एवमष्टादशसूत्रस्यार्थस्सम्यङ्निरूपितः।।
विशेषार्थोस्यसूत्रस्यमनगपिनविद्यते।।

।।सूत्रम् १६।।

।।अतःपूर्वस्मादप्यष्टांशधिकत्वंत्रयोदश न्यायेन।।

।।बोधानन्द वृत्तिः।।

ध्वांतापकर्षणंप्रोक्तंप्रकाशाधिक्यतःपुरा। अथेदानींतत्प्रमाणमस्मिन्सूत्रेनिरूप्यते।।१।।
प्रमाणबोधकपदान्यस्मिन्पंचयथाक्रमम्।
पदच्छेदनतस्सम्यङ्निर्णितानियथाविधि।।२।।
तत्रादिमपदात्तत्कारणंसम्यक्प्रदर्शितम्।
द्वितीयपदतःपूर्वोक्ताव्यक्तध्वांतमीरितम्।।३।।
तृतीयपदतस्संबंधकाव्ययमुदाहृतम्। चतुर्थदपदोध्वांताधिकमानंप्रदर्शितम्।।४।।
तथैवपंचमपदात्स्वतस्सिद्धोनिरूपितः।
पदार्थमेवमुक्त्वास्यसामान्यार्थोधुनोच्यते।।५।।

।।सामान्यार्थः।।

परस्पराकर्षणनध्वांतयोरुभयोःक्रमात्। यतस्सम्मेळनमभूदतःपश्चात्स्वभावतः।।
यावत्प्रमाणमव्यक्तावरणेसंस्थितंपुरा। तस्मादप्यष्टभागांशाधिकंतमस्स्वभावतः।।
त्रयोदशस्वतस्सिद्धन्यायमानानुसारतः। क्रमादभूत्पुनंस्तस्मिन्ध्वांताधिकमतस्स्मृतम्।।

एवंसामान्यार्थमुक्त्वासूत्रस्यास्ययथाक्रमम्। त्रयोदशस्वतस्सिद्धन्यायमद्यविविच्यते।।

।।स्वतस्सिद्धन्यायसूत्रम् ।।१३।।

।।विभाजितनिरंशवस्तुनोः परस्परापकर्षणं सहजम्।।

।।विश्वंभरवृत्ति।।

निरंशस्वांशप्रभेदाद्वस्तुलोकेद्विधास्मृतम्। अंशोनामंगइत्याहुश्शास्त्रेषुज्ञानवित्तमाः।।
वस्तूनितद्विशिष्टानिसांशानीतिविदुर्बुधाः। वस्तूनितद्विहीनानिनिरंशानीतिचक्रमात्।।
नृपक्ष्यगमृगाद्यास्तुतयोस्सांशाइतीरिताः। ध्वांतप्रकाशाकाशाद्यानिरंशाइतिकीर्तिताः।।
सांगोपांगविशिष्टस्वरूपाणांसांशवस्तुनाम्। व्यापकत्वंस्वप्रदेशमन्तरानहिविद्यते।।
सांगोपांगविहीनानांध्वांताकाशादिवस्तुनाम्। स्वस्वरूपंविनाव्यापकत्वंसर्वत्रविद्यते।।
उपाधिनिरुपाधिभ्यांसांगानामंगसंचयः। विभाजितोपिचतयोःपरस्परापकर्षणम्।।
अव्यापकस्वरूपत्वान्नास्तिकिंचिदपिस्वतः।
ध्वांतप्रकाशाकाशश्चोपाधिनाभेदिताअपि।।
निरंशकस्वरूपत्वादविनाभिवतःक्रमात्। परस्परापकर्षणेभवेत्तयोस्स्वभावतः।।
निरंशत्वाद्यापकत्वाद्विभागत्वमुपाधिना। नसंभवेत्किचिदपितमसस्सर्वथास्वलु।।
उपाधिनाभेदितवद्भ्रांत्यादृष्टमपिक्रमात्।
स्वस्यव्यापकशक्त्योपाधिस्थध्वांतापकर्षणम्।।
निरंशकत्वात्तमसस्सहजंस्यादितिक्रमात्। त्रयोदशस्व्रतस्सिद्धन्यायसूत्रविनिर्णयः।।

।।सूत्रम् २०।।

।।निरंशतवात्तमप्रकाशयोरन्योन्यव्यापकत्वावकाशस्त्र्युत्तरशतन्यायेन।।

।।बोधानन्द वृत्तिः।।

पूर्वसूत्रेतमोधिक्यमव्यक्तावरणेस्मृतम्।
व्यापकत्वावकाशत्वंप्रकाशध्वांतयोस्स्वतः।।१।।
परस्पराकीर्त्यतेस्मिन्सूत्रेसम्यग्यथाक्रमम्।
व्यापकत्वावकाशप्रबोधकानिपदानितु।।२।।
चत्वारिनिर्णितानिस्युस्सूत्रेस्मिन्विधिवत्क्रमात्।
तत्रादिमपदात्तस्मिन्निरंशत्वंप्रदर्शितम्।।३।।
द्वितीयपदतोध्वांतप्रकाशौसन्निरूपितौ।
अन्योन्यव्यापकत्वावकाशःप्रोक्तस्तृतीयतः।।४।।
स्वतस्सिद्धन्यायमानंचतुर्थपदतस्समृतम्।
पदार्थमेवमुक्त्वास्यसामान्यर्थोनिरूप्यते।।५।।

।।सामान्यार्थः।।

निरंशत्वंव्यापकत्वंतमःप्रकाशयोःक्रमात्।
स्वभावमितिशास्त्रेस्मिन्पूर्वमेवनिरूपितम्।।६।।
तस्मात्त्युत्तरशतस्वतस्सिद्धप्रमाणतः। क्रमात्प्रकाशस्तमसिप्रकाशेपितमस्तथा।।७।।
सर्वव्यापकशक्तित्वान्निरंक्त्युवाच्चकेवलम्।
प्राप्तुमन्योन्यावकाशोभवेत्सम्यक्स्वभावतः।।८।।
एवमुक्तंसमासेनसामान्यार्थोयथाक्रमम्। विशेषार्थोस्यविधिवत्संग्रहेणनिरूप्यते।।९।।

।।विशेषार्थः।।

यस्त्र्युत्तरशतन्यायमितिसूत्रेनिरूपितम्।
विविच्यतन्न्यायमत्रयथाशास्त्रंनिरूप्यते।।१०।।

।।स्वतस्सिद्धन्यायसूत्रम् १०३।।

विजातीयस्वरूपत्वेपिनिरंशवस्तुनोरन्योन्यव्यापकत्वंसहजम्

।।विश्वंभरवृत्ति।।

सजातीयस्वरूपोवाविजातीयोथवाक्रमात्।
योवाकोवाभवेद्वस्तुतयोस्सम्यक्स्वभावतः।।११।।
निरंशत्वव्यापकत्वस्भावोविद्यतेयदि।
विजातीयस्वरूपोपितयोरन्योन्यतःक्रमात्।।१२।।
स्वभावतोव्यापकत्वंभवत्येवनसंशयः। इतिस्वतस्सिद्धसूत्रन्ययमानविनिर्णयः।।१३।।

।।सूत्रम् २१।।

।।अतएवस्यात्परस्परंव्याप्तिरुभयत्र।।

पूर्वसूत्रेव्यापकत्वावकाशस्संप्रकीर्तितः।
तमप्रकाशयोरस्मिन्नन्योन्यव्याप्तिरुच्यते।।१।।
एतत्प्रबोधकपदान्थस्मिन्षण्णिर्णितानिहि।
तत्रादिमपदात्तत्कारणंसम्यक्प्रदर्शितम्।।२।।
तथैवावधारणार्थोद्वितीयपदतस्स्मृतः। पश्चात्तृतीयपदतःक्रियार्थस्सन्निदर्शितः।।३।।
चतुर्थपदतःप्रोक्तमन्योन्यत्वंतयोःक्रमात्।
व्याप्तिस्तुपंचमपदात्तयोस्सम्यक्प्रदर्शितम्।।४।।
तथैवषष्ठमपदाद्वव्यताप्तिस्थानंनिरूपितम्।
पदार्थमेवसुक्त्वास्यसामान्यार्थोधुनोच्यते।।५।।

।।सामान्यार्थः।।

व्यापकत्वावकाशत्वंपूर्वसूत्रेयतस्स्मृतम्। अतएवतयोस्वस्वसान्निध्यादेवकेवलम्।।६।।

क्रमात्प्रकाशेतमसः तथैवतमसिद्युतेः। परस्परंव्याप्तिरभूत्स्वभावादेवकेवलम्।।७।।
ननुतेजस्तिमिरयोर्विरुद्धधर्मिणोःक्रमात्।
कथंनुघष्टतेव्याप्तिर्विरुद्धत्वात्परस्परम्।।८।।
अतोव्याप्तिरसिद्धास्यात्तस्माच्छास्त्रंनिरर्थकम्।
शास्त्रदृष्ट्याव्याप्तिरुक्तातस्मात्तत्सिद्धमेंवहि।।९।।
श्रुतिप्रमाणात्सार्थिक्यमेतच्छास्त्रस्यविद्यते।
तथाहिवप्तिंःक्वदृष्टंशास्त्रेविरुद्धधर्मिणोः।।१०।।
इतिचेदुच्यतेशास्त्रप्रमाणुंमुनिसम्मत्। शक्तितंत्रेव्यप्तिनिर्णयाधिकारेविशेषतः।।११।।
अगस्त्यमुनिनाव्याप्तिलक्षणंसन्निरूपितम्।
तत्संगृह्ययथाशास्त्रंकिंचिदत्रनिरूप्यते।।१२।।

।।उक्तंहिशक्तितंत्रे।।

सृष्ट्यांक्रमात्सजातीयविजातीयप्रभेदतः। द्विविधंहिभवेद्वस्तुतयोर्निरंशवस्तुषु।।१३।।
क्रमाद्युतिःप्रकाशस्यतमसस्तमएवच। गगनंचांतरिक्षस्यसजातीयइतीरिताः।।१४।।
आकाशस्यद्युतिस्तद्वत्प्रकाशस्यतमःक्रमात्।
अंधकारस्यांतरिक्षंविजातीयाइतीरिताः।।४५।।
एतेषांरूपभेदोपिगुणभेदोनविद्यते। गुणस्तेंषाव्यापकत्वशक्तिरित्यभिधीयते।।१६।।
अन्योन्यव्यापकत्वंयत्तयोर्व्याप्तिरितीर्यते।
तद्व्याप्तिर्द्विविधाप्रोक्तासंयोगैक्यप्रभेदतः।।१७।।
वस्तुद्वयसमायोगमात्राद्यन्मेळनंभवेत्। तत्संयोगत्र्याप्तिरितिप्रवदन्तिमनीषिणः।।१८।।
रूपतश्शक्तितश्चैवयेषांसंमेळनंभवेत्।
तदैक्यव्याप्तिरित्याहुर्वस्तुनांशास्त्रवित्तमाः।।१९।।
एतद्वयाप्तिर्भवेत्सम्यक्सजातीयेषुवस्तुषु।
रूपतोगुणतश्चैवस्वभावत्वाद्विशेषतः।।२०।।
तथैवरूपभेदत्वाग्द्गुणैकत्वाच्चकेवलम्।
संयोगव्याप्तिस्सर्वत्रविजायतीयेषुवस्तुषु।।२१।।
भवत्येवस्वभावेनवस्तुसंयोगमात्रतः।।

इति।।

तस्माद्विरुद्धधर्मिणोस्तेनस्तिमिरयोःक्रमात्।
संयोगव्याप्तिमेवात्रशास्त्रदृष्ट्यानिरूपितम्।।२२।।
असिद्धोवाअनर्थोवाशास्त्रानुक्तत्वकारणात्।
त्वयोक्तंदूरतोपास्तंव्यप्तिस्स्वाभावकीभवेत्।।२३।।
एकविंशतिसूत्रार्थमित्थमुक्तंसमासतः। विशेषार्थोस्यसूत्रस्यवक्तुंनैवहिविद्यते।।२४।।

।।सूत्रम् २२।।

।।आपोतएव।।

।।बोधानन्द वृत्तिः।।

तमप्रकाशयोस्संयोगव्याप्तिः पूर्वसूत्रतः।
उक्तमस्मिन्तेनविद्युदापोत्पत्तिर्निरूप्यते।।१।।
उक्तमापोत्पत्तिप्रबोधकमस्मिन्पदद्वयम्। तत्रादिमपदाद्वैद्युदापोत्पत्तिर्निरूपिता।।२।।
द्वितीयपदतस्तत्कारणंसम्यङ्निरूपितम्। पदार्थमेवमुक्त्वास्यसामान्यार्थोधुनोच्यते।।

।।सामान्यार्थः।।

अब्रूपंद्विविधंप्रोक्तंविद्युद्भूतप्रभेदतः। तयोरादौविद्युदापोत्पत्तिक्रमोनिररूप्यते।।४।।
तेजरितमिरयोस्संयोगव्याप्त्यात्यन्तवेगतः।
क्रमात्तद्गुणशक्त्योस्संघर्षणोभूत्परस्परम्।।५।।
अतएवसृष्टिबीजंज्योतिरूपंमहत्तरम्। वैद्युतोदकमुद्भूतमव्यक्तावरणोपरि।।६।।
यदेतस्मादभूत्सृष्ट्सांसृष्टिबीजविभागतः।
तद्भूतोदकमित्याहुर्ज्ञानिनस्तत्वदर्शितः।।७।।
वैद्युतोदकमेवास्मिन्सूत्रेसम्यक्प्रकीर्तितम्।
एतेनैवजगत्सृष्टिरितिशास्त्रविनिर्णयः।।८।।
आपोवाइदमग्रेसलिलमासन्निितिश्रुतिः। आपएवससर्जादावित्यादिस्मृतयरतथा।।९।।
प्राहुस्सूत्रोक्तवैद्युतोदकमेवविशेषतः। एतदेवप्रकाशोदकमितिप्राहुरास्तिकाः।।१०।।

।।जलज्योति विलासेपि।।

अप्स्वरूपंप्रवक्षामिपूर्वाचार्यैर्थेरितम्। अव्यक्तावरणान्तस्थचिन्मयस्यांगकंपनात्।।११।।
सृष्ट्यादौयदभूदापस्तज्जयोतीरसउच्यते।
वैद्युतोदकमित्याहुस्तदेवज्ञानवित्तमाः।।१२।।
तस्मिन्नव्यक्तपुरुषस्सृष्ट्यर्थंजगतःक्रमात्।
स्वसंकल्पप्रकाशैककिरणांन्तर्गतंततः।।१३।।
स्वरूपविवृतहेतुंबीजशक्तिमवासृजत्। पश्चात्तदापोण्डमभूद्धेमरूपंमहत्तरम्।।१४।।
तत्रत्यविवृतशक्त्यंशस्वरूपंमहत्तरम्। अभजत्तत्सृष्टिबीजमण्डाकारंतथैवहि।।१५।।
यथासंकल्पितंपूर्वतथापश्चान्महेश्वरः।
स्वबीजमष्टधाकृत्वाग्न्यादवन्तंयथाक्रमम्।।१६।।
तत्पिण्डात्क्रमतोग्न्यादीन्समाहर्तुस्वतेजसा।
मुखाद्याशिश्नपर्यन्तमष्टस्थानान्यथाक्रमम्।।१७।।
तत्पिंण्डेकल्पयामासपृथक्पृथक्प्रभेदतः।
पश्चात्तेषुमुखस्थानाद्वागधिष्ठानरूपकम्।।१८।।

अग्निमाकर्षयामाससृष्ट्यर्थंजगदीश्वरः।
तथेंवनासिकास्थानात्प्राणाधिष्ठानरूपकम्।।१६।।
वायुमाकर्षयामासनेत्रस्थानात्ततःपरम्। सूर्यमाकर्षयामासनेत्राधिष्ठानरूपकम्।।२०।।
तथैवपश्चात्तत्पिण्डकर्णस्थानाद्यथाक्रमम्।
श्रोत्राधिष्टानरूपदिशस्सर्वान्समाहरत्।।२१।।
पश्चात्तथैवत्वक्स्थानाल्लोमाधिष्ठानरूपकान्।
ओषधीनाहरन्नानाविधान्सोमप्रपोषकान्।।२२।।
तथैवहृदयस्थानत्स्वांताधिष्ठानरूपकम्। समुद्ररच्चन्द्रमसंसुधामयमतःपरम्।।२३।।
नाभिस्थानादपानाधिष्ठानरूपंतथैवहि।
समाहरत्क्रमान्मृत्युंसर्वलोकविनाशकम्।।२४।।
शिश्नस्थानात्तथैवाथरेतोधिष्ठानरूपकम्।
आपस्समाहरद्द्रवान्तशक्तिरूपंद्रवात्मकम्।।२५।।
एतदेवहिशास्त्रुषुभूतोदकमितीर्यते। जगत्सृष्ट्यर्थमेवंक्रमेणसाक्षान्महेश्वरः।।२६।।
विभाजितस्ववीर्यांशानग्न्याद्यबन्तरूपकान्।
तत्पिण्डस्याष्टस्थानेभ्यस्समुद्धरद्यथाक्रमम्।।२७।।
पूर्वमव्यक्तसृष्ट्यर्थमव्यक्तावरणोपरि। यदापःप्रादुरासीत्तद्वैद्युदापइतीर्यते।।२८।।
वैद्युतोदकमाहृत्यभगवान्जगदीश्वरः।
चन्द्रमाद्यष्टस्थानेषुखेविभज्यनियोजयत्।।२६।।
पश्चाद्विभाज्याष्टधाभूतोंदकंचतथैवहि।
कूर्माद्यावातस्कन्धान्तमष्टस्थानेषुशंकरः।।३०।।
भूगोळेस्थापयामासजगत्सृष्ट्यर्थमंजसा।
चन्द्रमाद्यष्टस्थानीयशक्तिभिर्वैद्युतंजलम्।।३१।।
पश्चात्संक्षोभितंतेननानात्वमभजत्क्रमात्। एवमेवहिभूगोळेभूतोदकमपिक्रमात्।।३२।।
कूर्मादिशक्तिसंक्षोभादनेकत्वमवापहि। अनयोर्वैद्युतोदकंप्रकाशइतिशास्त्रतः।।३३।।
भूतोदकंतमइतिप्रवदन्तिमिनीषिणः। तेजःपुरुषइतिचसृष्टिबीजमितिक्रमात्।।३४।।
तमःप्रकृतिरितिचबीजगर्भेतिशास्त्रतः। प्रवदन्तिविशेषेणज्ञानिनस्तत्वदर्शिनः।।३५।।
अनयोःप्रकृतिपुरुषरूपयोध्वान्ततेजसोः।
संयोगतस्स्वभावेनभागसंख्यानुसारतः।।३६।।
अव्यक्तसृष्टिर्व्यक्तास्वादेतत्सृष्टिरितीर्यते।
एतदेवात्मविवृतस्वरूपमितिचक्रमात्।।३७।।

इत्यादि।।

।।अप्तत्वप्रकाशिकायामषि।।

अव्यक्तावरणान्तस्थनारायणांगकंपनात्।
तत्रत्यतेजस्तिमिरशक्तयोस्संघर्णणस्स्वतः।।३८।।
अभूत्परस्परंपश्चात्तेनात्यन्तोष्णमुद्बभौ।
तदुष्णवेगात्संजातंवैद्युतोदकमद्भुतम्।।३६।।

इत्यादि।

अतएवेत्यत्रसूत्रेएतत्कारणमीरितम्। वैद्युतोदक्रमेवापइत्यत्रप्रकटीकृतम्।।४०।।

।।सूत्रम् २३।।

।।विद्युत्प्रकाशयोः परस्परापकर्षणमेकस्थरूपत्वादुभयत्रैकोननवतितमन्यायेन।।

।।बोधानन्द वृत्तिः।।

पूर्वसूत्रेवैद्युतोदकोत्पत्तिस्मन्निरूपिता। अस्मिन्नव्यक्तपुरुषवैद्युतोदकयोःक्रमात्।।१।।
स्वरूपभूतविद्युत्प्रकाशयोरुभयोरपि। परस्पराकर्षणत्वंप्रोच्यतेन्यायमानतः।।२।।
एतत्प्रबोधकपदान्यस्मिन्पंचयथाक्रमम्।
निर्णितानियथाशास्त्रंपदच्छेदनतस्स्फुटम्।।३।।
तत्रादिमपदाद्विद्युत्प्रकाशौसन्निदर्शितौ।
अन्योन्याकर्षणंतद्वद्द्वितीयपदतस्तयोः।।४।।
स्वरूपैकत्वमुक्तंस्यात्तृतीयपदतस्तथा। विद्युज्जलाव्यक्तपुरुषौतुरीयपदात्स्मृतौ।।५।।
तयैवपंचमपदात्स्वतस्सिद्धोनिदर्शितः।
पदार्थमेवमुक्त्वास्यसामान्यार्थोधुनोच्यते।।६।।

।।सामान्यार्थः।।

अव्यक्तावरणान्तस्थपुरुषस्यतथैवहि। तदावरणबाह्यस्थविद्युज्जलस्यचक्रमात्।।७।।
उभयोर्विद्युत्प्रकाशस्वरूपत्वंस्वभावतः।
एकत्वादेवविद्युत्प्रकाशयोस्तत्स्वरूपतः।।८।।
एकोननवतितमन्यायमानांनुसारतः। आकर्षणभूत्सम्यगुभयत्रपरस्परम्।।६।।

।।तदुक्तंसृष्टिविलासे।।

अव्यक्तपुरुषविद्युद्वारिणोरुभयोःक्रमात्।
विद्युत्प्रकाशाकारत्वमेकमेवेतिनिर्णितम्।।१०।।

इत्यादि।।

सूत्रेयदेकोननतितमन्यायईरितः। तद्विविच्यात्रविधिवत्संग्रहेणनिरूप्यते।।११।।

।।स्वतस्सिद्धन्यायसूत्रम्८६।।

।भिन्नवस्तुत्वेपिस्वरूपशक्त्यैक्यत्वेतसोःपरस्पराकर्षणंसहम्।

।।विश्वंभरवृत्तिः।।

योवाकोवाभवेद्वस्तुभिन्नजातीयवस्तुनोः।
स्वरूपशक्त्योरैक्यत्वेसत्यन्योन्यापकर्षणम्।।१२।।
सहजंस्यात्तयोस्तम्यगितिन्यायविनिर्णयः।
इतित्रयोविंशतिकस्सूत्रार्थस्संग्रहात्स्मृतः।।१३।।

।।सूत्रम् २४।।

।।तयोःप्रतिफलमनत स्तस्मिन्दर्पणादित्यकिरणवत्।।

।।बोधानन्द वृत्तिः।।

पूर्वसूत्रेव्यक्तपुरुषवैद्युतोदकयोः क्रमात्।
परस्परास्वस्वरूपशक्त्याकर्षणमीरितम्।।१।।
तथैवास्मिन्तयोस्सम्यगव्यक्ततमसिक्रमात्। कीर्त्यप्रेप्रतिफलनंपरस्परंस्वभावतः।।२।।
प्रतिफलनबोधकपदान्यस्मिन्यथाक्रमम्। पदच्छेदनतःपंचनिर्णितानियथाविधि।।३।।
तत्रादिमपदाद्वारिपुरुषौसन्निपितौ। तद्वत्तयोःप्रतिफलनत्वमुक्तंद्वितीयतः।।४।।
तृतीयपदतस्तत्कारणत्वंसन्निरूपितम्। चतुर्थपदतोव्यक्ततमोरूपंनिदर्शितम्।।५।।
तयैवपंचमपदाद्दृष्टान्तस्सन्निदर्शितः।
पदार्थमेवमुक्त्वास्यसामान्यार्थोधुनोच्यते।।६।।

।।सामान्यार्थः।।

यथैवप्रतिफलनमादित्यकिरणस्यहि। भवेत्कृष्णमुखदर्शेतथैवात्यन्तवेगतः।।७।।
पूर्वोक्ताव्यक्तपुरुषवैद्युतोदकयोस्तयोः। अतएवप्रतिफलनंतदव्यक्ततमस्यमूत्।।८।।

।।कृष्णमुखादर्शमुक्तंदर्पणप्रकरणे।।

कर्बुरपारदमौक्तिककुरटिंसैकतद्रौणिकतुंबरकन्दम्।
प्राणक्षारस्फाटिकलवणंनळिकात्वक्सौरिकफटिकारम्।।६।।
टंकणबर्बुरनागकिशोरं मांचुळिकंपीतकंकृणीमूलम्।
एतान्वस्तून्शुद्धिंकृत्वासमभागांशान्मूषामध्ये।।१०।।
निक्षिप्याथशिवामुखकुंडे आच्छाद्येंगालाग्निशिलाद्यैः।
वेगात्संगाल्य पंचोत्तरत्रिशतकक्ष्योष्णमानतस्सम्यक्।।११।।
वैराजिकयंत्रमुखेतद्रसमुद्धृत्य सेचयेत्पश्चात्।
एवंकृतिविमृदुळंयानांगंभारवर्जितंसुदृढम्।।१२।।
भवतिमनोहरमद्भूतभास्करकिरणापकर्षणंदिव्यम्।

अत्यन्तसुन्दरास्यं कृष्णमुखादर्श्यामतिरुचिरम्।।१३।।

इत्यादि।।

चतुर्विंशतिसूत्रार्थस्संप्रदायांमुसारतः। इतिसंकीर्तितंसम्यक्संग्रहेणयथामति।।१४।।

।।सूत्रम् २५।।

।। तस्मात्तदुपर्यनन्तसृष्टिपथरेखाप्रसारणं सर्वत्र।।

।।बोधानन्द वृत्तिः।।

पूर्वसूत्रेव्यक्तपुरुषवैद्युतोदकयोःक्रमात्। परस्पराशक्त्यपकर्षणमुक्तंयथाविधि ।।१।।
तथैवास्मिन्सृष्टिपथरेखानिर्णयमुच्यते। रेखाप्रबोधकपदान्यस्मिन्चतुःक्रमात्।।२।।
पदच्छेदनतस्सम्यङ्निर्णितानियथाविधि।
तत्रादिमपदाच्छक्तिद्वयसंयोगकारणम्।।३।।
उकंद्वितीयपदतोव्यक्तावरणमीरितम्। रेखापथप्रसारणंतृतीयपदतस्स्मृतम्।।४।।
चतुर्थपदतस्तद्रेखापथस्थानमीरितम्। पदार्थमेवमुक्त्वास्यसंग्रहेणयथाविधि।।५।।
सामान्यार्थोद्यविधिवत्कीर्त्यतेसंप्रदायत।।

।।सामान्यार्थः।।

पूर्वोक्तशक्तिद्वयसंयोगकारणतः क्रमात्। अनन्तसृष्टिपथरेखाप्रसारणमद्भुतम्।।६।।
सर्वत्राभूत्तदव्यक्तावरणोयपर्यनेकधा। इतिशास्त्रेषुविद्वद्भिस्तत्रतत्रनिरूपितम्।।७।।

।।तदुक्तंब्रह्माण्डसारे।।

ब्रह्माण्डसृष्टिरेखापंथानश्शास्त्रेषुभूरिशः।
अनन्ताइतिविख्यातास्सृष्टितत्वविशारदैः।।८।।

इत्यादि।।

।।सूत्रम् २६।।

।।शक्तयोनव।।

।।बोधानन्द वृत्तिः।।

पूर्वसूत्रेसृष्टिरेखाप्रसारणमुदीरितम्। तासामस्मिन्यृथाशास्त्रंकीर्त्यन्तेनवशक्तयः।।१।।
शक्तिप्रबोधकपदद्वयमस्मिन्यथाक्रमम्।
षदच्छेदनतस्सम्यङ्निर्णितंस्याद्यथाविधि।।२।।
तत्रादिमपदाद्रेखाशक्तयस्सन्निदर्शिताः।
द्वितीयपदतस्तत्संख्याप्रमाणंनिरूपितम्।।३।।
एवंपदद्वयार्थोक्तस्संप्रदायानुसारतः। सामान्यर्थोद्यसूत्रस्यसंग्रहेणनिरूप्यते।।४।।

।।सामान्यार्थः।।

ब्रह्माण्डसर्जनपथरेखाणांशक्तयःक्रमात्।
घनादिनवइत्युक्ताश्शास्त्रेषुज्ञानवित्तमैः।।५।।

।।तदुक्तंसृष्टिविलासे।।

धनाकर्षणसंकोचविकासनप्रसारणाः।
विकल्पनागर्भकृच्चपुष्टिर्ज्योतिप्रकाशकाः।।६।।
इत्येतेसृष्टिरेखाणांशक्तयोनवकीर्तिताः।
तास्वेतास्सहजाइतिप्रोक्तास्तत्वविदांवरै।।७।।

इत्यादि।।

।।सूत्रम २७।।

।।तच्छक्त्यपकर्षणात्ध्वान्तसंमेळनंसर्वत्र।।

।।बोधानन्द वृत्तिः।।

पूर्वसूत्रेशक्तिपथरेखाशक्तयईरिताः। तद्रेतुध्वांतसंमेळनमस्मिन्प्रचक्षते।।१।।
तन्मेळनप्रबोधकपदानित्रीण्यथाक्रमम्।
अस्मिन्सूत्रेनिर्णितानिपदच्छेदनतस्स्फुटम्।।२।।
तत्रादिमपदाद्धूवान्ताकर्षणंशक्तिभिस्समृतम्।
द्वितीयपदतोध्वान्तसंमेळनमुदीरितम्।।३।।
संमेळनस्थानमुक्तंतृतीयपदतस्तथा। पदार्थमेवमुक्तवास्यसामान्यर्थोद्यकीर्त्यते।।४।।

।।सामान्यार्थः।।

पूर्वोक्ताव्यक्ततमसियारेखास्संप्रसारिताः।
विद्युत्प्रकांशरूपास्तासृष्टिरेखास्स्वभावतः।।५।।
तत्सृष्टिरेखाशक्तीनामपकषर्णतस्ततः। तासुरेखासुसर्वत्राव्यक्तस्थतमसःक्रमात्।।६।।
संमेळनमभूत्सम्यगविनाभावतस्स्वतः। इत्तिसामान्यर्थमुक्तस्सूत्रस्यास्ययथामति।।७।।

।।सूत्रम् २८।।

।।तच्छक्तिसंयोगाद्रोहिण्याविर्भाव स्तस्मिन्षोडशोत्तरद्वितन्यायेन।।

।।बोधानन्द वृत्तिः।।

उक्तवासंमेळनंपूर्वसूत्रेतमप्रकाशयोः।
तस्माच्छक्त्यन्तरोत्पत्तिस्सूत्रेस्मिन्सन्निरूप्यते।।१।।
तदुत्पत्तिप्रबोधकपदान्यस्मिन्चतुःक्रमात्।
पदच्छेदनतस्सम्यङ्निर्णितानियथाविधि।।२।।

तमप्रकाशयोश्शक्तिस्तत्रादिमपदात्स्मृता।
द्वितीयपदतश्शक्त्यन्तरोत्पंत्तिर्निदर्शिता।।३।।
अव्यक्तावरणंतद्वत्तृतीयपदतस्स्मृतम्। स्वतस्सिद्वन्यायमुक्तंचतुर्थपदतःक्रमात्।।४।।
पदार्थमेवमुक्त्वास्यसंप्रदायानुसारतः। सामान्यर्थोद्यविधिवत्संग्रहेणनिरूप्यते।।५।।

।।सामान्यार्थः।।

षोडशोत्तरद्विशतन्यायमानानुसारतः। तमप्रकाशयोश्शक्तिसंयोगादेवकेवलम्।।६।।
तस्मिन्नव्यक्तावरणेसृष्ट्याधारामहत्तरा। वैद्युतोदकमध्यस्थशक्तित्रयविभेदिनी।।७।।
रोहिणीनामकाकाचिच्छक्तिःप्राविरभूत्स्वतः।
ब्रह्माण्डधारणीह्येषास्वशक्त्यासर्वतोमुखा।।८।।

।।शक्तित्रयमुक्तंसृष्टिविलासे।।

जलरेतोरसमयाब्रह्माण्डोत्पत्तिहेतुकाः।
वैद्युतोदकमध्यस्थशक्तयस्त्रिविधास्स्मृताः।।६।।

इत्यादि।।

एवंसामान्यार्थमुक्तवासूत्रस्यास्ययथाक्रमम्।
स्वतस्सिद्धन्यायसूत्रंसंग्रहेणद्यकीर्त्येते।।१०।।

।।स्वतस्सिद्धन्यायसूत्रम्२६।।

।।शक्तिद्वयसंयोगेशक्त्यंतराविर्भावस्सहजम्।।

।।विश्वंभरवृत्ति।।

सजातीयविजातीयप्रभेदाच्छक्तयोद्विधा।
शक्तिद्वयसमायोगस्तयोर्यत्रभवेत्क्रमात्।।११।।
तत्रशक्त्यंतरोत्पत्तिस्सहजंस्यादितीरितम्।
इतिस्वतस्सिद्धसूत्रप्रोक्तन्यायविनिर्णयः।।१२।।
एवमष्टाविंशतिकसूत्रार्थस्संप्रदायतः।
समालोच्ययथाशास्त्रंसामान्येननिरूपितम्।।१३।।

।।सूत्रम् २६।।

।। तत्संयोगात्घनत्वंतच्छक्तीनाम्।।

।।बोधानन्द वृत्तिः।।

रोहिण्याविर्भाजमुक्त्वापूर्वसूत्रेयथाविधि। वैद्युतोदकशक्तीनामस्मिनघनत्वमीर्यते।।१।।
घनप्रबोधकपदान्यस्मिन्त्रीणियथाविधि।
पदच्छेदनतस्सम्यङ्निर्णितानियथाक्रमम्।।२।।
पूर्वाक्तरोहिणीशक्तिस्तत्रादिमपदात्स्मृता। द्वितीयपदतस्तद्वद्धनत्वंसन्निदर्शितम्।।३।।

तृतीयपदतोविद्युज्जलशक्तयईरिताः। पदार्थमेवमुक्त्वास्यसामान्यर्थोधुनोच्यते।।४।।

।।सामान्यार्थः।।

पूर्वोक्तरोहिणीशक्तिसंयोगेनयथाक्रमम्। त्रिविधानांवद्युैतोदकशक्तीनांस्वभावतः।।५।।
घनत्वमभवत्सम्यगितिसूत्रार्थनिर्णयः।
एवंसामान्यार्थमुक्त्वासूत्रस्यास्यंयथामति।।६।।
अथेदानींसंग्रेणविशेषार्थोनिरूप्यते।।

।।विशेषार्थः।।

।।घनत्रयस्वरूपमुक्तंब्रह्माण्डसारे।।

आदिदेवोमहादेवःपरमात्मासनातनः। निराकारोनिर्गुणोभूत्सृष्ट्यादावेकएवहि।।७।।
स्वयमेवपरात्माथसृष्ट्यर्थलीलयाक्रमात्।
अव्यक्तरूपमासाद्यतमसाभासयन्स्वतः।।८।।
अपएवससर्जादौस्वांगाद्घनत्रयात्मकम्।
आपोघनस्यात्प्रथमोततोरेतोघनस्स्मृतः।।९।।
पश्चाद्रसघनइतिप्रोक्तंजलघनत्रयम्।
व्यक्ताव्यक्तविभागाभ्यांपिंडब्रह्मांडयोःपुनः।।१०।।
पृथिवीदेहजीवादिविकारेणयथाक्रमम्। विवृत्ताकांरतोह्यतेत्रिघनाएवकेवलम्।।११।।
प्रपंचाकारतस्सम्यग्भ्राजन्तेसर्वतोमुखाः।
सृष्टिबीजमितिप्राज्ञास्तान्येवाहुर्विशेषतः।।१२।।

इत्यादि।।

।।प्रपंचलहर्यामपि।।

अव्यक्तरूपोभगवान्सृष्टयर्थस्वांगतस्स्वयम्।
आपएवससर्जादौघनत्रयात्मकंक्रमात्।।१३।।

इत्यादि।।

।।मनुस्मृत्यामपि।।

योसावतीन्द्रियोग्राह्योसूक्ष्मोव्यक्तस्सनातनः।
सर्वभूतमयोचिंत्यस्सएवस्वयमुद्बभौ।।१४।।
सोभिध्यायशरीरात्स्वात्सिसृष्टिुर्विविधाः प्रजाः।
आपएवससर्जादौतासुबीजमवांसृजत्।।१५।।

बीजंनाम जलघन, रेतोघन, रसघनस्वरूपमितिज्ञेयम्।।

।।सूत्रम् ३०।।

।। विब्द्युच्छक्त्यपकर्षणात्तासुघनत्रयव्याप्तिस्सर्वत्र।।

||बोधानन्द वृत्तिः||

वैद्युतोदकशक्तीनां घनत्वंपूर्वसूत्रतः।
उक्त्वाघनत्रयव्याप्तिस्तद्रेखास्वत्रकीर्त्यते॥१॥
तव्द्ययाप्तिबोधकपदान्यस्मिन्युतुःक्रमात्।
पदच्छेदनतस्सम्यङ्निर्णितानियथाक्रमम्॥२॥
तत्रादिमपदात्प्रोक्तंविद्युच्छक्त्यपकर्षणम्।
द्वितीयपदतस्सृष्टिरेखास्सम्यक्प्रदर्शिताः॥३॥
घनत्रयव्याप्तिरुक्तातृतीयपदतस्तथा।
चतुर्थपदतोव्याप्तिस्थानंसम्यक्प्रदर्शितम्॥४॥
पदार्थमेवमुक्तवास्थसूत्रस्यविधिवत्क्रमात्।
संग्रहेणयथाशास्त्रंसामान्यार्थोधुनोच्यते॥५॥

||सामान्यार्थः||

पूर्वोक्तसृष्टिरेखाणांविद्युत्च्छक्त्यपकर्षणात्।
अन्तर्बहिश्चसर्वत्रतद्रेखासुयथाक्रमम्॥६॥
जलशक्तित्रयघनव्याप्तिरन्योन्यतस्स्वतः।
अभूदितियथाशास्त्रसामान्यार्थोनिरूपितः॥७॥

||सूत्रम् ३१||

|| शक्तित्रयसंयोगाब्द्रंह्माण्डाविर्भावस्ता–
सुजलबुद्धुदवत्षोडशोत्तरद्विशतन्यायेन||

पूर्वसूत्रेघनत्रयशक्तिव्याप्तिर्निरूपिता।
अस्मिन्तत्सृष्टिरेखासुब्रह्माण्डोत्पत्तिरुच्यते॥१॥
ब्रह्मांडोत्पत्तिबोधकपदान्यस्मिन्यथाक्रमम्।
पदच्छेदनतःपंचनिर्णितानियथाविधि॥२॥
तत्रादिमपदाच्छक्तित्रयसंमेळनंस्मृतम्। ब्रह्माण्डाविर्भावमुक्तंद्वितीयपदतस्तथा॥३॥
तृतीयपदतस्सृष्टिरेखास्सम्यक्प्रदर्शिताः।
दृष्टान्तमण्डोत्पत्तिविद्यौचतुर्थपदतस्स्मृतः॥४॥
तथैवपंचमपदात्स्वतस्सिद्धोनिदर्शितः।
पदार्थमेवमुक्त्वास्यसामान्यार्थोधुनोच्यते॥५॥

।।सामान्यार्थः।।

सृष्टिरेखासमुत्पन्नविद्युच्छक्तिस्तथैवच।
अव्यक्तस्थतमोशक्तिश्शक्तिर्घनत्रयस्यच।।६।।
इमास्त्रिशक्तयस्सम्यग्ब्रह्मांडोत्पत्तिहेतुकाः।
पूर्वोक्तसृष्टिरेखासुआसांसंमेळनात्स्वयम्।।७।।
षोडशोत्तरद्विशतन्यायमानानुसारतः। ब्रह्मांडोत्पत्तिरभवज्जलेबुब्दुदवत्क्रमात्।।८।।
इत्युक्तमेतत्सूत्रस्यसामान्यार्थोयथाक्रमम्।
समालोच्ययथाशास्त्रंसंग्रहेणयथामति।।९।।

।।सूत्रम् ३२।।

।।तद्घनशक्त्यांतदितरशक्त्यंशसंमेळलनान्त– स्मिन्प्रसारितरेखानुसारेण।।

।।बोधानन्द वृत्तिः।।

ब्रह्मांडाविर्भावमुक्त्वापूर्वसूत्रेयथाक्रमम्।
तदाविर्भावएवास्मिन्विशदीकृत्यकीर्त्यते।।१।।
पदानिपंचसूत्रेस्मिन्निर्णितानियथाविधि। तत्रादिमपदादुक्तब्रह्माण्डस्सन्निदर्शितः।।२।।
तथाविद्युज्जलघनशक्तिरुक्ताद्वितीयतः। तृतीयपदतोध्वांतविद्युच्छक्त्यंशईरितः।।३।।
चतुर्थपदतोवैद्युतोदकंसन्निदर्शितम्। तथैवपंचम्पदात्सृष्टिरेखाःप्रदर्शिताः।।४।।
एवंक्रमेणसूत्रस्यपदार्थस्सन्निरूपितः। सामान्यर्थोद्यविधिवत्संग्रहेणप्रचक्षते।।५।।

।।सामान्यार्थः।।

पूर्वविद्युज्जलवनशक्तिरित्यदुदीरितम्।
तस्यांतदितरध्वान्तविद्युच्छक्त्योर्यथाक्रमम्।।६।।
तत्तद्भागानुपारेणपुनस्सम्मेळनात्स्वतः।
जलप्रसारितसृष्टिरेखानुसारतःक्रमात्।।७।।
तस्मिन्विद्युज्जलेतद्ब्रह्मांसडोत्पत्तिरितिस्मृतम्।।

।।शक्त्यंशस्सृष्टिविलासेनिरूपितः।।

शक्तयस्त्रिविधाःप्रोक्तब्रह्मांडोत्पत्तिहेतुकाः।
सृष्टिरेखासुवर्तन्तेस्वभावादेवकेवलम्।।८।।
तासुविद्युद्ध्वान्तशक्तीसृष्टिरेखास्वरूपके।
एकाविद्युज्जलघनशक्तिर्व्यापकरूपिणी।।९।।
क्रमादेतज्जलघनशक्त्यांसायकस्वभावतः।
रेखाविद्युद्ध्वान्तशक्त्योस्तत्तद्भागानुसारतः।।१०।।

संमेळनात्स्वभावेनवेगात्तद्वैद्युतोदके। संघर्षणंभवेत्पश्चात्तद्वेगेनस्वभावतः।।११।।
महापद्मोष्णस्वरूपाकाचिच्छक्तिर्महत्तरा।
संजाताबाडबानाममहाज्वालासमाकुला।।१२।।
क्षीरेमंडनवत्पश्चातच्छक्तेरुष्णतःक्रमात्।
विद्युज्जलैकांशमात्रमंडत्वमभजत्स्वतः।।१३।।
एतद्ब्रह्मांडमित्याहुश्शास्त्रेषुज्ञानवित्तमाः।
यथाचौदुंबरेवृक्षे आमूलाग्रंफलोदयः।।१४।।
भवेत्तथैवासमंतात्सृष्टिरेखसुभूरिशः । अनेककोटिब्रह्माण्डान्येवमेवभवन्तिहि।।१५।।
इत्यादि।।

।।भागांशनिर्णयः कृतः तत्रैव।।

तत्रव्यापकशक्त्यंशस्त्रैकांशइतिकीर्तितः।
पंचैकांशइतिप्रोक्तंविद्युच्छक्तेस्तथैवहि।।१६।।
तमोशक्तेर्दशैकांशइतिभागविनिर्णयः।।
इत्यादि।।

।।सूत्रम् ३३।।

।।एतत्पंचदशात्मकः कुण्डलिन्याम्।।

।।बोधानन्द वृत्तिः।।

ब्रह्माण्डानांपूर्वसूत्रेस्मृतमुत्पत्तिकारणम्।
श्वेतवाराहकल्पब्रह्माण्डस्यचयथाक्रमम्।।१।।
स्थानंसंख्यांचगणितागममार्गनुसारतः।
कीर्त्यतेस्मिन्संग्रहेणतेषुसम्यग्यथाविधि।।२।।
तत्रवाराहकल्पब्रह्मांडमादिपदात्स्मृतम्। द्वितीयपदतस्तद्वत्तत्संख्यासन्निदर्शिता।।३।।
तृतीयपदतश्चापितत्स्थनंसन्निदर्शितम्।
पदार्थमेवमुक्त्वास्यसामान्यार्थोधुनोच्यते।।४।।

।।सामान्यार्थः।।

अव्यक्तपंजरस्थितविद्युज्जलोपरिक्रमात्।
ब्रह्माण्डानांसृष्टिरेखापंथानस्सर्वतोमुखाः।।५।।
सत्यनन्तास्स्वभावेनतन्मध्येतुयथाक्रमम्।
अस्तिकाचित्कुंडलिनीनामरेखाशलाकवत्।।६।।
यथोदुंबरवृक्षेसंत्यामूलाग्रंफलानिहि। तथैवतत्कुंडलिनीरेखायांचविशेषतः।।७।।
अनेककोटिब्रह्मांडान्यामूलाग्रंवसंतिहि।
तेष्वेतच्छ्वेतवारहकल्पब्रह्मांडगोळकम्।।८।।

अव्यक्तात्पंचदशंकोट्यात्मकमितिस्फुटम्।
वाल्मीकिगणितरीत्यागणितागमपारगैः।।९।।
विशदीकृत्यविधिवन्निर्णितविबुधै क्रमात्।
ननुवाराहकल्पस्यब्रह्माण्डगणनेक्रमात्।।१०।।
संख्याभेदेनविबुधाःपरस्परंविरोधतः। वदन्तिनानाप्रभेदात्तस्मादंडंयथार्थतः।।११।।
निश्चित्यपंचदशकोट्यात्मकमितिक्रमात्।
कथंनुघटतेवक्तुंतस्माच्छास्त्रंनिरर्थकम्।।१२।।
बाढं(नूनं) त्वयायदुक्तंतच्छास्त्रंनसहतेयतः।
शास्त्रनुभवदूरत्वात्केवलंस्यान्निरर्थकम्।।१३।।
शास्त्रप्रमाणमस्माकंस्वानुभूतिस्तयैवच।
तस्माद्यदुक्तमस्माभिंब्रह्मांडगणनेक्रमात्।।१४।।
शास्त्रानुभवसिद्धत्वात्ज्ञानिनांग्राह्यमेवतत्।
निंदंतुवापिनन्दत्वज्ञानाच्छास्त्रपराङ्मुखाः।।१५।।
श्वेतवाराहकल्पब्रह्माण्डस्यगणनक्रमे।
कावाहानिस्तत्प्रकाणंसमालोच्यात्रकीर्त्यते।।१६।।

।।तदुक्तमण्डनिर्णयाधिकारे।।

ब्रह्माण्डपरिगणनविधौगणितशास्त्रतः।
गणितज्ञैर्निर्णितानिकेंद्राणिद्वादशक्रमात्।।१७।।
ब्रह्माण्डकल्पोक्तरीत्यातेपांनामान्यथाक्रमम्।
संगृह्यात्रयथाशास्त्रंसंग्रहात्सन्निरूप्यते।।१८।।
महापथोव्यक्तकूर्मवारुणोकिरणरतया।
ज्वालामुखोवृष्णिचक्रोवातस्तंभोग्रहस्तथा।।१९।।
शेषोगजधृवश्चेतिप्रोक्तास्युर्द्वादशधृवाः।
एकैंकधृवमारभ्यब्रह्माण्डान्तंयथाविधि।।२०।।
गणितागमोक्तरीत्यागुणितंचेद्यथाक्रमम्। ब्रह्माण्डगणनविधिर्भिद्यतेर्केद्रभेदतः।।२१।।
महापथक्रमेणेतद्ब्रह्मांडंगणयेद्यदि। लक्षाणांषोडशतथाषट्सहस्त्रोपरिक्रमात्।।२२।।
एकादशोत्तरशतात्मकोंडमितिकीर्त्यते।
अव्यक्तकेंद्रात्तत्पंचदशकोट्यात्मकंभवेत्।।२३।।
तदेवकूर्मधृवात्संगुण्यतेचेद्यथाविधि।
पंचाशत्कोट्यैकलक्षत्रिसहस्त्रशतात्मकम्।।२४।।
श्वेतवाराहकल्पब्रह्मांडंभवतिसंख्यया। पुनस्तद्वारुणकेंद्रस्थानात्संगुण्यतेयदि।।२५।।
दशकोट्यशीतिलक्षदशसाहस्रकोपरि। द्वात्रिंशदुत्तरशतात्मक्रंभवतिहिक्रमात्।।२६।।

एवंक्रमेणकिरणकेंद्रस्थानादिभिःक्रमात्।
संगुण्यतेचेद्ब्रह्मांडस्थानसंख्यापृथक्पृथक्।।२७।।
प्रतिद्यतेविशेषेणतत्तत्केंद्रप्रभेदतः। अव्यक्तकेंद्रादूणितगणनक्रमभेदतः।।२८।।
श्वेतवाराहकल्पब्रह्मांडमत्रयथाक्रमम्।
निर्णितंस्यात्पंचदशकोट्यात्मकमितिस्फुटम्।।२९।।
एतेनब्रह्मांडभेदंवक्तुंनभवतिधृवम्। एवंशास्त्रप्रमाणत्वाद्ब्रह्मांडगणनक्रमः।।३०।।
अंगीकृतहिविद्वद्भिस्सिद्धान्तत्वेनकेवलम्।
तस्माद्यदुक्तंशास्त्रेतत्पूर्वपक्षमसंगतम्।।३१।।

।।सूत्रम् ३४।।

।।शतकोट्योजनप्रमाणमेतत्।।

।।बोधानन्द वृत्तिः।।

ब्रह्मांडसंख्यांस्थानंचपूर्वमूत्रेनिरूपितम्। तत्प्रमाणंचसूत्रेस्मिन्यथाशास्त्रंप्रचक्षते।।१।।
प्रमाणबोधकपदद्वयमस्मिन्विनिर्णितम्। तत्रादिमपदादंडप्रमाणंसंप्रदर्शितम्।।२।।
द्वितीयपदतस्तद्वद्ब्रह्मांडंसन्निरूपिनम्।
पदार्थमेवभुक्त्वास्यसामान्यार्थोधुनोच्यते।।३।।

।।सामान्यर्थः।।

अनेककोटिब्रह्मांडप्रमाणानियथाक्रमम्।।
शास्त्रेत्वनेकधासम्यक्प्रोक्तानिज्ञानवित्तमैः।।४।।
तेषुवाराहकल्पब्रह्मांडमानंप्रमाणतः। शतकोट्योजनमितिर्निर्तंसूत्रतःक्रमात्।।५।।

।।तदुक्तमण्डकौंस्तुभे।।

पंचाशत्कोटिविस्तीर्णपंचाशत्कोटिरुन्नतम्।
आहत्यब्रह्मांडमानंशतकोटयोजनंविदुः।।६।।

इत्यादि।

।।सूत्रम् ३५।।

।।अथोच्यतेशक्तिपंजरमस्मिन्।।

।।बोधानन्द वृत्तिः।।

पूर्वसूत्रेण्डप्रमाणमुक्तमस्मिन्तथैवहि। सृष्टिलिंगप्रदर्शकशक्तिपंजरमुच्यते।।१।।
चत्वारितत्प्रबोधकपदान्यस्मिन्यथाक्रमम्।
तत्रादिमपदादानन्तर्यार्थस्सन्निदर्शितः।।२।।
द्वितीयपदतस्तद्वत्क्रियार्थस्संप्रदर्शितः। तृतीयपदतश्शक्तिपंजरंसमुदीरितम्।।३।।

सूत्रंचतुर्थपदतस्सूचितंस्याद्यथाक्रमम् ।
पदार्थमेवमुक्त्वास्यसामान्यार्थोधुनोच्यते ।।४।।

।।सामान्यार्थः ।।

एतावत्पर्यन्तमस्मिन्शास्त्रेब्रह्माण्डनिर्णयः ।
सप्रमाणंसंग्रहेणविविच्यपरिकीर्तिमम् ।।५।।
अथेदानीमात्मकृतशक्तिपंजरमद्भुतम् । सिसृक्षताशंक्तिमयंसृष्ट्यंकनप्रदर्शकम् ।।६।।
क्रमात्संकीर्त्यतेसम्यक्सप्रमाणंयथाविधि ।
पश्चाद्विद्युज्जलेव्यक्तपुरुषस्यचिदात्मनः ।।७।।
सिसृक्षताशक्तिरूपवीर्यमेवयथाक्रमाम् ।
कल्पयद्ब्रह्मांडमेतच्छतकोट्योजनोन्नतम् ।।८।।
तदाकारंवर्तुलमित्युच्यतेकुक्कुटाण्डवत् ।
सृष्ट्यर्थजनगतस्तस्मिन्सूक्ष्मशब्देनसंयुतम् ।।९।।
चित्ताकाशंजगद्बीजंसंददेजगदीश्वरः । पश्चातदंबरेकालविपाकेनस्वभावतः ।।१०।।
शब्दगर्भान्माविद्युत्प्रकाशस्समजायत ।
तत्प्रकाशोन्तर्बहिश्चव्याप्यांडेंहेमवत्क्रमात् ।।११।।
प्रकाशरूपमकरोदासमंतात्स्वशक्तितः ।
संग्राह्यपश्चादंडस्थप्रकाशंसर्वतोमुखम् ।।१२।।
तदंडमध्येभगवान्सन्नियम्यैकरूपतः । यथाचित्रंलेखयितुंचित्रकारोयथाविधि ।।१३।।
अत्यंतशुद्धंसुदृढमादौशास्त्रनुसारतः । पटमेकंकल्पयतिस्वसंकल्पानुतारतः ।।१४।।
तथोपादाननिभित्तशक्तिभ्यामतिविस्तरात् ।
जगच्चित्रंलेखयितुंजगदीशोनिरंजनः ।।१५।।
आदौसिसृक्षाताशक्त्यांगुणशक्तीस्समांशतः ।
संयोज्यसृष्टिसंकल्पानुंसारेणयथाक्रमम् ।।१६।।
तेजस्तिमिरसंयुक्तंनिर्ममेशक्तिपंजरम् ।
तस्मिन्सर्वजगत्सृष्टिर्लक्ष्मणांसप्रदर्श्यते ।।१७।।

।।सूत्रम् ३६।।

।।ध्वान्तसंयोगंत्वात्पिण्डत्वंतस्य ।।

।।बोधानन्द वृत्तिः ।।

तेजस्तिमिरसंयुक्तंपंजरेपूर्वसूत्रतः । उक्तवास्मिन्तत्प्रत्यमासःपिंडत्वंकीर्त्यतेधुना ।।१।।
पदानित्रीणिसूत्रेस्मिन्निर्णितानियथाक्रमम् ।
तत्रादिमपदादव्यक्तांधकरोनिदर्शितः ।।२।।
तत्प्रकाशस्यपिंडत्वंद्वितीयपदतस्स्मृतम् । पंजरस्थज्योतिरुक्तंतृतीयपदतस्तथा ।।३।।

पदार्थमेवमुक्तवास्यसूत्रस्यविधिवत्क्रमात् ।
अथेदानींसंग्रेहणसामान्यार्थोनिरूप्यते ।।४ ।।

।।सामान्यार्थः ।।

शक्तिपंजरमध्यस्यकेंद्रशक्त्यपकर्षणात् ।
क्रमात्त्रत्यांधकारस्तत्केन्द्रस्थद्युतेस्स्वतः ।।५ ।।
अर्धस्थादर्धभागंसमावृणोत्स्यीयशक्तितः ।
आत्मनस्सृष्टिसंकल्पानुसारेणैवकेवलम् ।।६ ।।
पश्चातदन्तराळस्थप्रकाशोध्वान्तयोगतः ।
शिरःपाण्यादिभिर्युक्तंपिंडाकारंप्रपेदिरे ।।७ ।।
तत्पिंडमेवप्रथमशरीरीतितथैवहि । हिरण्यगर्भइतिचविधाताब्रह्मइत्यपि ।।८ ।।
चतुर्मुखस्सृष्टिकर्तास्वयंभूरितिचक्रमात् । प्रवदन्तिविशेषेणशास्त्रेषुब्रह्मवादिनः ।।९ ।।
इतिपंजरमध्यस्थप्रकाशर्धस्यसूत्रतः । पिंडत्वंध्वांतसंयोगादभूदितिविनिर्णितम् ।।१० ।।

।।तदुक्तंसृष्टिविलासे ।।

शक्तिपंजरमध्यस्थप्रकाशस्ययथाक्रमम् ।
तत्रत्यध्वांतसंयोगादर्धभागस्स्वभावतः ।।११ ।।
तदधस्थात्पिंडरूपम्भूदीशाज्ञयाक्रमात् ।।

इति ।।

।।सूत्रम् ३७ ।।

।।तच्छक्त्यातदण्डभेदनं कालविपाकान्नरिकेळवत् ।।

।।बोधानन्द वृत्तिः ।।

पूर्वसूत्रेप्रकाशस्यपिंडत्वंसमुदीरितम् । अथेदानींकीर्त्यंतस्मिन्ब्रह्मांडस्यविभेद्नम् ।।१ ।।
तत्रादिमपदात्सम्यक्पिंडशक्तिर्निरूपिता । द्वितीयपदतस्तद्वदंडभेदनमीरितम् ।।२ ।।
तृतीयपदतःकालविपाकस्सन्निदर्शितः । तथाचतुर्थपदतोदृष्टान्तस्संप्रकीर्तितः ।।३ ।।
पदार्थमेवमुक्त्वास्यसंग्रहेणयथामति । अर्थदानींसमासेनसामान्यार्थःप्रचक्षते ।।४ ।।

।।सामान्यार्थः ।।

अण्डस्योत्पत्तिमारभ्यपुनस्तच्छेदनावधि । देवमानानुसारेणसंवत्सरइतीरितः ।।५ ।।
सएवकालविपाकादित्यत्रकालशब्दतः । उक्तंतदंडमध्यस्थपिंडस्यापितथैवहि ।।६ ।।
विपाकशब्दात्प्रोक्तंस्यात्परिपाकोभिवृद्धये ।
तथैववर्तुलाकारंनारिकेळफलंक्रमात् ।।७ ।।
ताडनादिभ्द्यतेसम्यक्समभागंयथाद्विधा । तथैवश्वेतवाराहकल्पब्रह्माण्डमप्यथ ।।८ ।।
तत्पिंडशक्त्याभिवृद्धिंगतयाकालमानतः ।
विभाजितमभूद्देवधामध्यभागात्समंयथा ।।९ ।।

।।सूत्रम् ३८।।

।।ततस्तच्छक्त्यातदूर्ध्वाधस्तत्कपालयोःप्रतिष्ठा।।

।।बोधानन्द वृत्तिः।।

ब्रह्मांडभेदनंपूर्वसूत्रेशक्त्यानिरूपितम्।
अस्मिन्प्रतिष्ठानंस्यानंवकीर्त्यतेतत्कपालयोः।।१।।
एतत्प्रबोधकपदान्यस्मिन्पंचयथाक्रमम्।
पदच्छेदनतस्सम्यङ्निर्णितानिस्फुटंयथा।।२।।
आनन्तर्यार्थमुक्तंस्यात्तत्रादिमपदात्तथा।
अंडस्थबीजशक्तिर्यासाद्वितीयपदात्स्मृता।।३।।
अंडस्योर्ध्वाधःप्रदेशौतृतीयपदतस्स्मृतौ। चतुर्थपदतोंडस्यकपालद्वयमीरितम्।।४।।
तथैवपंचमपदात्प्रतिष्ठोक्ताकपालयोः।
पदार्थमेवमुक्तवास्यसामान्यार्थोद्यकीर्त्यते।।५।।

।।सामान्यार्थः।।

पश्चात्पूर्वोक्तब्रह्मांडस्थितशक्त्याययाक्रमम्।
श्वेतवाराहकल्पस्यब्रह्मांडोर्ध्वप्रदेशके।।६।।
तथैवाधःप्रदेशेवतद्ब्रह्मांडकयालयोः। कृतंप्रतिष्ठासृष्ट्यर्थकंर्तुतच्छक्तिपंजरम्।।७।।

।।सूत्रम्३९।।

।।तदाकर्षणात्तमप्रकाशयोर्द्वैविध्यमव्यक्तस्य।।

।।बोधानन्द वृत्तिः।।

पूर्वसूत्रेण्डकपालप्रतिष्ठासन्निरूपिता। अव्यक्तध्वान्तप्रकाशविभागोस्मिन्प्रचक्षते।।१।।
सूत्रेपदानिचत्वारिनिर्णितानियथाक्रमम्। तत्रादिमपदात्तत्कपालाकर्षणमीरितम्।।२।।
अव्यक्ततमप्रकाशौद्वितीयपदतस्स्मृतौ। पश्चात्तृतीयपदतस्तद्विभागोनिदर्शितः।।३।।
तद्वच्चतुर्थपदतोव्यक्तशक्तिर्निरूपिता।
एवंपदार्थमुक्त्वस्यसामान्ययार्थोनिरूप्यते।।४।।

।।सामान्यार्थः।।

कपालद्वयमध्यस्थशक्त्याकर्षणतःक्रमात्।
पूर्वोक्ताव्यक्तमंडलप्रकाशध्वान्तयोर्द्विधा।।५।।
विभागोभूत्स्वभावेनमाघिमागर्भवत्क्रमात्।
पश्चात्तौययुतुस्तत्कापालस्थानंप्रतिस्वतः।।६।।

।।तदुक्तं ब्रह्माण्डसारे।।

कपालद्वयमध्यस्थाव्यक्तमंडलसंस्थितौ।
ध्वान्तप्रकाशौवेगेनतच्छक्त्याकर्षणात्स्वतः।।७।।
द्विधाभूत्वातयोःपश्चादूर्ध्वांशोवेगतस्स्वयम्।
ऊर्ध्वस्थितांडकपालमध्यकेन्द्रमवापहि।।८।।
अधस्स्थिताण्डकपालमध्यकेन्द्रंतथैवच। द्वितीयांशोगमत्पश्चात्तत्रस्थैर्यमवापतः।।९।।

।।सूत्रम् ४०।।

।।तदुभयसंघर्षणात्कश्यपज्योतिः।।

।।बोधानन्द वृत्तिः।।

तमप्रकाशयोर्भेदः पूर्वसूत्रेनिरूपितः। अस्मिन्कश्यपसूर्यस्यज्योतिमंडलमुच्यते।।१।।
पदद्वयंहिसूत्रेस्मिन्निणितंसंप्रदायतः। तत्रादिमपदाच्छक्तिसंघर्षणःप्रदर्शितः।।२।।
कश्यपोत्पत्तिरुक्तास्यादि्दवतीयपदतस्तथा।
पदार्थमेवमुक्त्वास्यसामान्यार्थोधुनोच्यते।।३।।

।।सामान्यार्थः।।

कपालद्वयशक्त्योरव्यक्तशक्त्योःपरस्परम्।
अत्यन्तसंघर्षणेनबृहदाकारतःक्रमात्।।४।।
सृष्टेस्समष्टिबीजशक्तिरूपमचंचलम्। बहिरुष्णतथैवान्तश्शीतलंसर्वतोमुखम्।।५।।
नानाविचित्रकिरणैस्संयुतसृष्टिकारकम्।
समुद्भूतंखभावेनकश्यपज्योतिमण्डलम्।।६।।

।।ब्रह्माण्डसारेपि।।

अव्यक्ताग्नीषोमशक्तीविभज्यजगदीश्वरः।
सृष्ट्यर्थजगतस्तत्कपालयोरुभयोरपि।।७।।
अधःकपालेंधकारशक्तिमूर्ध्वकपालके। क्रमात्प्रकाशशक्तिंचसन्ददेस्वीयतेजसा।।८।।
पश्चात्तदुभयशक्त्योस्संघर्षणात्परस्परम्।
स्वतःप्राविरभूद्दिव्यंकश्यपज्योतिमण्डलम्।।९।।

।।इत्यादि।।

।।शौनकमूत्रेपि।।

अथातः कश्यपोत्पत्तिं व्याख्यास्यामः कपालीव्यक्तशक्त्योस्संघर्षणादव्यक्त पुरुषस्र्यान्तर्ज्योतिः कशयपवर्णस्थ सृष्टिशक्तीनां वसुरुद्रोड्वब्ध्यंश सम्मेळनान्मण्डलंकृत्वा तदुपाधिना कश्यपत्वंप्राप्य प्राविरभूत्।।

।। इत्यादि।।

।।सूत्रम् ४१।।

।।एवमव्यक्त ध्वान्ताधःकपालशक्त्योस्संघर्षणात्कूर्मपीठम्।।

।।बोधानन्द वृत्तिः।।

पूर्वसूत्रेकश्यपस्योत्पत्तिमुक्त्वायथाक्रमम्।
कूर्मपीठोत्पत्तिरस्मिन्संग्रहेणप्रकीर्त्यते।।१।।
सूत्रेपदानिचत्वारिनिर्णितानियथाक्रमम्। तत्रादिमपदात्पूर्वक्रमस्सम्यक्प्रदर्शितः।।२।।
ध्वान्ताधःकपालशक्तिद्वितीयपदतस्स्मृते।
तयोंस्संघर्षणःपश्चात्तृतीयपदतस्स्मृतः।।३।।
चतुर्थपदतःकूर्मपीठमुक्तंयथाक्रमम्। पदार्थमेवमुक्त्वास्यसामान्यार्थोनिरूप्यते।।४।।

।।सामान्यार्थः।।

अधःकपालाव्यक्तान्धकारशक्त्योःपरस्परम्।
संघर्षणात्समुद्भूतंकूर्मपीठंमहत्तरम्।।५।।

।।इति सामान्यार्थः।।

।।सूत्रम् ४२।।

।।तदुभय शक्तिसंघर्षणाद्वातस्कन्धः।।

।।बोधानन्द वृत्तिः।।

कूर्मपीठोत्पत्तिमुक्त्वापूर्वसूत्रेयथाविधि।
वातस्कन्धोत्पत्तिरस्मिन्संग्रहेणनिरूप्यते।।१।।
पदच्छेदनतस्सूत्रेनिर्णतंस्यात्पदद्वयम्। तच्छक्तिद्वयसंयोगस्तत्रादिमपदात्स्मृतः।।२।।
वातस्कन्धोत्पत्तिरपिद्वितीयपदतस्स्मृता।
पदार्थमेवमुक्त्वास्यसामान्यार्थोधुनोच्यते।।३।।

।।सामान्यार्थः।।

पूर्वाक्तकश्यपकूर्मपीठशक्त्योःपरस्परम्।
संयोगतोस्विलजगत्सृष्टिसंधारणात्मकः।।४।।
कूर्मकश्यप्योर्मध्येवातस्कन्धस्समुब्दभौ।
वास्तकन्धोत्पत्तिरेवंसूत्रेस्मिन्संप्रचक्षिता।।५।।

।।सूत्रम् ४३।।

।।कश्यपवातस्कन्धशक्त्योस्संयोगात्सृष्टिगर्भोत्पत्तिस्तददिती रिति।।

।।बोधानन्द वृत्तिः।।

वातस्कन्धोत्पत्तिमुक्त्वापूर्वसूत्रेयथाक्रमम्।
इदानीमदितिशक्त्युत्पत्तिरस्मिन्विधीयते।।१।।
पदानिषण्णिर्णितानिसूत्रेस्मिन्संप्रदायतः।
तत्रकश्यपवातस्कन्धशक्तीआदिमात्स्मृते।।२।।
द्वितीयपदतस्तत्संयोगस्सम्यक्प्रदर्शित। तृतीयपदतस्सृष्टिगर्भोत्पत्तिर्निरूपिता।।३।।
चतुर्थपदतोत्पत्तिरेवसम्यङ्निदर्शिता। तथैवपंचमपदान्नामतस्यैवकीर्तितम्।।४।।
तथैवषष्ठमपदान्निश्चयार्थोनिरूपितः।
पदानामेवमुक्त्वार्थसामान्यार्थोस्यकीर्त्यते।।५।।

।।सामान्यार्थः।।

पूर्वोक्तवातस्कन्धकश्यपशक्त्योःपरस्परम्।
संयोगात्सृष्टिगर्भाख्याकाचिच्छक्तिरजायत।।६।।
सैवादितिरितिप्रोक्ताशास्त्रेषुज्ञानवित्तमैः।
इतिसंग्रहतस्सामान्यार्थोस्यप्रतिपादितः।।८।।

।।सूत्रम् ४४।।

।।गर्भास्सप्त।।

।।बोधानन्द वृत्तिः।।

पूर्वसूत्रेशक्तिगर्भाशक्तिमुक्त्वायथाक्रमम्। तद्गर्भानांप्रभेदोस्मिन्संग्रहेणप्रचक्षते।।१।।
पदद्वयंहिसुवेस्मिन्दच्छेदनतस्स्मृतम्। तत्रादिमपदाद्गर्भास्सामान्येनप्रदर्शिताः।।२।।
द्वितीयपदतस्तासांसंख्यासम्यक्प्रदर्शिता।
एवमुक्त्वापदार्थोरयसामान्यार्थोधुनोच्यते।।३।।

।।सामान्यार्थः।।

कालविद्युद्भूतऋतुशीतोष्णकिरणइति।
गर्भास्सप्तईतिप्रोक्ताअदितेस्सृष्टिहेतुकाः।।४।।

।।सप्तगर्भलक्षणमुक्तंगर्भतत्वप्रकाशशिकायाम्।।

भूतविद्युत्कालऋतुशीतोष्णकिरणाःक्रमात्।
एतेसप्तादितेर्गर्भाइतिप्रोक्तामहर्षिभिः।।५।।

।।सूत्रम् ४५।।

।।भूतकिरणाःचितत्संयोगात्।।

।।बोधानन्द वृत्तिः।।

उक्त्वादितेस्सप्तगर्भान्पूर्वसूत्रेयथाक्रमम्। अथेदानींपंचभूतोंत्पत्तिरंस्मिन्प्रचक्षते।।१।।

पदानित्रीणिसूत्रेस्मिन्निर्णितानियथाविधि ।।
तत्रादिमपदाद्भूतकिरणास्संप्रदर्शिताः ।।२ ।।
द्वितीयपदतस्तद्वत्तत्संख्यासन्निरूपिता । कश्यपगर्भसंयोगस्तृतीयपदतस्स्मृतः ।।३ ।।
पदानामेवमुक्त्वार्थस्सूत्रस्यास्ययथामति ।
अथेदानींसंग्रेहणसामान्यार्थोनिरूप्यते ।।४ ।।

।।सामान्यार्थः ।।

कश्यपस्यादितेर्भूतगर्भशक्तेश्चकेवलम् । परस्परमसमांयोगादाकाशदिक्रमेणहि ।।५ ।।
तद्ग्र्भतःपंचभूतकिरणास्संवभूवतुः । एवंसामान्यार्थमुक्त्वाविशेषर्थोस्यकीर्त्यते ।।६ ।।

।।विशेषार्थः ।।

।।तदुक्तंसृष्टिविलासे ।।

सोकामयतबहुस्यांप्रजायेयेतिवाक्यतः ।
आत्मनस्सृष्टिसंकल्पशक्तिंप्राहसनातनी ।।७ ।।
सैवमूलप्रकृतिरित्यात्मनोपाधिरित्यपि । संकीर्तिताविशेषेणशास्त्रेषुज्ञानवित्तमैः ।।८ ।।
सईक्षितेतिवाक्येनेक्षणाशक्तिंपरात्मनः । तथैवकृपयाप्राहश्रुतिर्लोकहितैषिणी ।।९ ।।
यदीक्षणाशक्तिरितिश्रृतिवाक्यादुदीरिनम् ।
तदात्मप्रकाशइतिप्रवदन्तिमनीषिणः ।।१० ।।
यत्सृष्टिसंकल्पशक्तिरित्युक्तंश्रुतिवाक्यतः ।
तच्छायातमइत्याहुश्चित्प्रकाशस्यकेवलम् ।।११ ।।
पश्चात्तदीक्षणाशक्त्याप्रकृतिःक्षोभितासति ।
समष्टिव्यष्टिभेदेनसृष्ट्यर्थमभवद्विधा ।।१२ ।।
तयोस्समष्टिशक्तिर्यागुणसाम्यात्परात्मनः ।
प्रतिबिंबसमासाद्यतस्मिन्नैवचिदात्मनि ।।१३ ।।
असंपर्कात्स्वयंपश्चात्पद्मपत्रमिवांभसि । अविनाभावतोनित्यमवर्ततस्वभावतः ।।१४ ।।
याव्यष्ठिशक्तिरित्युक्ताप्रकृतेश्शास्त्रतस्तया ।
सैवतत्प्रतिबिंबेनसंयुंक्ताध्वांतरूपिणी ।।१५ ।।
गुणवैशम्यतःपश्चात्त्रिधाभूत्वाययथाक्रमम् ।
समष्टिशक्तिवत्तस्मिन्नविनाभावतस्स्वयम् ।।१६ ।।
अवर्ततस्वभावेनसर्वदापरमात्मनि । ततस्स्वसृष्टिसंकल्पशक्तिमाहृत्यवेगतः ।।१७ ।।
संददेस्वेक्षणाशक्त्यांजगत्सृष्टयर्यमीश्वरः ।
पश्चात्तत्सृष्टिसंकल्पशक्तिस्स्वगुणभेदतः ।।१८ ।।
स्वान्तर्गतेक्षणाशक्तिंसमावृणोत्त्रिधाक्रमात् । एतदावरणमेवमुनयोब्रह्मवादिनः ।।१९ ।।

त्रयीमण्डलमित्याहुरादित्यइतिचक्रमात्।
पश्चात्तदीक्षणाशक्तिःचित्प्रकाशस्वरूपिणी।।२०।।
हिरण्यगर्भत्वमभजदादित्योपाधितस्स्वतः। हिरण्यगर्भइतियःपूर्वमेवप्रकीर्तितः।।२१।।
सएवात्रविशेषेणविशदीकृत्यवर्णितः। एपएवविशेषेणजगत्सृष्टिंविचिन्तयन्।।२२।।
स्वप्रकाशांशोनपश्चात्कश्यपज्योतिंमडलम्।
जगत्सृष्ट्यर्यमसृजत्स्वयमेवविभुःक्त्रमात्।।२३।।
तथैवस्वोपाधिभूतादित्यशक्तिंमहौजसम्।
समाकृष्यादितिशक्तिस्वरूपेणविनिर्मिमे।।२४।।
पश्चात्तदितिशक्तिःकश्यपाकर्षणात्स्वयम्।
तमेवावृत्यवेगेनसप्तगर्भान्प्रपेदिरे।।२५।।
तत्सप्तगर्भकश्यपशक्त्योस्संयोगतस्स्वतः।
पंचभूतादिक्रमेणजगत्सृष्टिर्भविष्यति।।२६।।

इत्यादि।।

।।पंचभूतोत्पत्तिरुक्तंतत्रैव।।

कश्यपस्चमयूखानांभूतगर्भस्चवादितेः। अन्योन्यसंघर्षणेनसूक्ष्मशब्दसमन्वितः।।२७।।
आकाशकिरणोजातश्शक्तिभिर्दशभिर्युतः।
तयोष्कश्यपशक्त्यंशआकाशइतिकीर्तितः।।२८।।
सोवकाशइतिप्रोक्तस्सृष्ट्यधिष्ठानमित्यपि।
तथैवादितिशक्त्यंश्शब्दइत्यभिधीयते।।।२९।।
सएवेक्षणसंकल्पशक्तिभ्यामात्मनःपुनः।
संचोदितोनेककोटिब्रह्माण्डाकारमाययौ।।३०।।
इदमेवविशेषेणश्रुतिस्मृत्यादिषुक्रमात्। ब्रह्मणोविवृतरूपमितिप्राहुर्मनीषिणः।।३१।।
तच्छब्दाकाशसंयोगाच्छब्दस्पर्शात्मकोनिलः।
संजातोभूत्त्रयोदशशक्तिभिर्मिळितःक्रमात्।।३२।।
तच्छब्दस्पर्शसंयोगादष्टशक्तिसमन्वितः।
क्रमाच्छब्दस्दर्शरूपात्मकोग्निस्समजायत।।३३।।
अग्नेश्शब्दस्पर्शरूपशक्तिसंघर्षणात्ततः।
दृश्यादृश्यस्वतोमेध्यशक्तिभिर्दशभिर्युतः।।३४।।1
आपोभवद्रूपरसशब्दस्पर्शात्मकःक्रमात्। शब्दस्पर्शरूपरसशक्तिसंघर्षणादपाम्।।३५।।
शब्दस्पर्शरूपरसगन्धशक्त्यात्मकाततः।
संजातापृथिवीपंचदशशक्तिभिरन्विता।।३६।।
क्रमादेतान्पंचभूतकिरणानेवशास्त्रतः। पंचभूतानीतिसम्यक्प्रवदन्तिमनीषिणः।।३७।।
एतानिपंचभूतानिजगद्वृक्षस्यकेवलम्। शुद्धबीजस्वरूपाणिप्रभवन्तिस्वभावतः।।३८।।

।।भूतशक्तिप्रभेदश्शक्तिसर्वस्वेनिरूपितः।।

शब्दोवकाशसूक्ष्मश्चव्यापकोदृश्यमेवच।
अधिष्ठानंस्थिरोस्पर्शअग्राह्योमानइत्यपि।।३९।।
आकाशशक्तयइतिदशैतेसंप्रकीर्तिताः। शब्दोवेगःकंपनश्चघर्षणोछेदनस्तथा।।४०।।
प्रसारणोप्राणनश्चप्रवाहश्शीतळस्तथा।
द्रवोघनोष्णस्पर्शश्चेत्येतेस्युर्वायुशक्तयः।।४१।।
उष्णश्शब्दस्पन्दनश्चरूपंकान्तिश्शिखातथा।
दाहकःपाचकश्चाग्नेश्शक्तयोष्टइतीरितः।।४२।।
शब्दोरूपंरसस्स्पर्शशीतोवेगःप्रवाहकः। घर्षणोजृंभणोद्भेदनश्चेतिजलशक्तयः।।४३।।
शब्दस्पर्शोरूपरसगन्धकाठिन्यमार्दवम्।
आकर्षणोत्क्षेपणश्चविकासोवमनोचलः।।४४।।
पोषकोनाशकोगालनश्चेत्यवनिशक्तयः।।

।।इत्यादि।।

।।एवमुक्तप्रकारेणविशेषार्थोस्यकीर्तितः।।

।।सूत्रम् ४६।।

।।एवमारोगादयस्सप्तकिरणाः कश्यपकिरणगर्भयोस्संघर्षणात्।।

।।बोधानन्द वृत्तिः।।

पंचभूतोत्पत्तिमुक्त्वापूर्वसूत्रेयथाक्रमम्।
अस्तिमन्नारोगादिसप्तकिरणोत्पत्तिरुच्यते।।१।।
पदानिपंचसूत्रेस्मिन्निर्णितानियथाक्रमम्। तत्रादिमपदात्पर्वूदृष्टान्तस्संप्रदर्शितः।।२।।
आरोगादीनिनामानिद्वितीयपदस्स्मृतः। तृतीयपदतस्तद्वत्किरणास्सप्तईरिताः।।३।।
कश्यपकिरणगर्भौचतुर्थपदतस्स्मृतौ। तथैवपंचमपदात्तत्संघर्षणईरितः।।४।।
पदार्थमेवमुक्त्वास्यासंप्रदायानुसारतः। सामान्यार्थोद्यविधिवत्संग्रहेणनिरूप्यते।।५।।

।।सामान्यार्थः।।

आरोगाद्यास्सप्तकिरणाःकश्यपस्यमहात्मनः।
पूर्वोक्तपंचभूतकिरणोत्पत्तिवत्क्रमात्।।६।
कश्यपादितिकिरणगर्भशक्त्योःपरस्परम्।
संघर्षणात्समुत्पन्नामण्डलाकारतस्सवतः।।७।।
एतेषांनामधेयानियजुरारण्यकेक्रमात्। प्रोक्तानिसप्ततान्येवसंगृह्यात्रविलिख्यते।।८।।

आरोगोभ्राजःपटरःपतंगस्स्वर्णरस्तथा।
ज्योतिषीमान्विभासकश्चेतिसप्तयथाक्रमम्।।६।।
किरणाःकश्यपस्यैतेसप्तसूर्याइतीरिताः।
एतैरेवजगत्सृष्टिरितिशास्त्रविनिर्णयः।।१०।।

।।सूत्रम् ४७।।

।।तच्छक्त्याकर्षणात्तदुभयप्रतिष्ठातस्मिन्।।

।।बोधानन्द वृत्तिः।।

सप्तसूर्योत्पत्तिमुक्त्वापूर्वसूत्रेयथाक्रमम्।
अथास्मिन्तद्भूतसर्यप्रतिष्ठासन्निरूप्यते।।१।।
पदानित्रीणिसूत्रेस्मिन्निर्णितानियथाविधि।
तत्रादिमपदादुक्तंवातस्कंधापकर्षणम्।।२।।
भूतसूर्यप्रयिष्ठोक्ताद्वितीयपदतस्तथा। तृतीयपदतोवातस्कंधस्सम्यङ्निदर्शित्।।३।।
पदार्थमेवमुक्त्वास्ययथावत्संप्रदायतः। सामान्यार्थोद्यविधिवत्संग्रहेणनिरूप्यते।।४।।

।।सामान्यार्थः।।

पूर्वेद्विचत्वारिंशतिकसूत्रेयत्प्रतिपादितम्।
वातस्कंधोत्पत्तिरितितच्छक्त्याकर्षणात्स्वतः।।५।।
पूर्वोक्तपंचभूतानांसप्तार्काणामतःपरम्।
प्रतिष्टाभूत्क्रमातस्मिन्वातस्कंधेपृथक्पृथक्।।६।।
सप्तचत्वारिंशतिकसूत्रस्यास्यविचारतः। एवमुक्तंसंग्रहेणसामान्यार्थोयाथाविधि।।७।।

।।सूत्रम् ४८।।

।।अथाभवन्तदुभयशक्तिसंमेळनात्तस्मिन्नसंख्याकास्सृष्टिशक्त यंःकूर्माद्याकश्यपान्तम्।।

।।बोधानन्द वृत्तिः।।

पूर्वसूत्रेपंचभूतसप्तसूर्यस्थितिस्समृता।
क्रमाज्जगत्सृष्टिशक्त्युत्पत्तिरस्मिन्निरूप्यते।।१।।
पदानिसप्तसूत्रेस्मिन्निर्णितानियथाक्रमम्। तत्रादिमपदादानंतर्यार्थस्सन्निरूमितः।।२।।
द्वितीयपदतस्सम्यक्क्रियार्थस्सन्निदर्शित। तृतीयपदतश्शक्तिंद्वयसंयोगईरितः।।३।।
पश्चाच्चतुर्थपदतोवातस्कंधोनिरूपितः। तथाचतुर्थपदतोसंख्याकत्वमुदीरितम्।।४।।
तथैवपंचमपदादसंख्याकत्वमीरितम्। क्रमेणषष्ठमपदाच्छक्त्युत्पत्तिर्निदर्शिता।।५।।
शक्तिस्थानंक्रमात्सप्तमपदेननिरूपितम्।
पदार्थमेवमुक्त्वास्यसामान्यार्थोधुनोच्यते।।६।।

।।सामान्यार्थः।।

पंचभूतानीतिपूर्वसप्तसूर्याइतिक्रमात्।
येतुप्रोक्तास्तदुभयशक्त्योस्संमेळनात्स्वतः।।७।।
कूर्मपीठंसमारभ्यकश्यपान्तंयथाक्रमम्।
वातस्कंधेअसंख्याकानानाचित्रविचित्रकाः।।८।।
संवभूवुर्जगत्सृष्टिशक्तयस्सर्वतोमुखाः। सूत्रस्यैवंसमासेनसामान्यार्थःप्रकीर्तितः।।९।।

।।सूत्रम् ४९।।

।।तत्संमेळनाच्छक्तिपंजरम्।।

।।बोधानन्द वृत्तिः।।

पूर्वसूत्रेसृष्टिशक्त्युत्पत्तिमुक्त्वायथाक्रमम्।
क्रमादिस्मिन्जगत्सृष्टिशक्तिपंजरमुच्यते।।१।।
पदच्छेदनतस्सूत्रेपदद्वयमुदीरितम्। तत्रादिमपदाच्छक्तिसंमेळलनमुदाहृतम्।।२।।
द्वितीयपदतस्तद्वच्छक्तिपंजरमीरितम्। पदार्थमेवमुक्त्वास्यसामान्यार्थोनिरूप्यते।।३।।
पूर्वोक्तसृष्टिशक्तीनामनुलोमविलोमतः। अन्योन्यमेळनात्सृष्टिशक्तिपंजरमुब्दभौ।।४।।
एतज्जगत्सृष्टिशक्तिपंजरोत्पत्तिनिर्णयः। पराशरेणमुनिनाविस्तरेणयथाक्रमम्।।५।।
अंडकौंस्तुभशास्त्रेसप्रमाणात्परिकीर्तितम्।
तत्रस्थितान्कतिपयान्पन्जरोत्पत्तिबोधकान्।।६।।
प्रकृतोपयुक्तश्लोकान्संगृह्यात्रयथाक्रमम्।
बालानांसुखबोधाययथामतिनिरूप्यते।।७।।

।।अण्डकौंस्तुभे नवमाध्याये पराशरः।।

वियत्पवनतेजोंबुभुवनानीतिशास्त्रतः। नामानिपंचभूतानांपंचधाकीर्तितानिहि।।८।।
तथैवसप्तसूर्याणांसप्तनामान्यपिक्रमात्। आरोगाभ्राजःपटरःपतंगस्स्वर्णरस्तथा।।९।।
ज्योतिषीमान्विभासश्चेत्युक्तानिश्रुतिवाक्यतः।
एतेषुसप्तार्कपंचभूतेषुविविधाःक्रमात्।।१०।।
वर्तन्तेशक्तयोनन्तास्सृष्टेर्बीजखरूपकाः।
यास्तासुसृष्ट्युपयुक्तशक्तयस्सन्तिमुख्यतः।।११।।
तासांसंख्यात्राविधिघद्वाल्मीकिगणितक्रमात्।
वारंवारंसमन्वीक्ष्ययथामातिनिरूप्यते।।१२।।
सागरणांपंचदशखर्वाणांसप्तविंशतिः। न्यर्बुनांपंचविंशदर्बुदानांचषोडश।।१३।।
कोटीनांपंचचत्वांरिंशल्लक्षाणांद्विसप्ततिः।
सहस्राणांद्विपंचाशच्छतानांनवचक्रमात्।।१४।।
पूर्वोक्तपंचभूतेषुएकैकस्मिन्यथांक्रमम्। स्वभावेनैववर्तन्तेअविनाभावतःक्रमात्।।१५।।

पूर्वोक्तारोगादिसप्तसूर्येषुचस्वभावतः।
प्रपंचसृष्टयुपयुक्तशक्तयस्सन्तियाःक्रमात्।।१६।।
तासांसंख्याचविधिवत्सम्यगन्वीक्ष्यकीर्त्यते।
महाद्मसहस्राणिमहाक्षोणीशतंतथा।।१७।।
क्रमान्महासागराणामष्टाशीप्तिरततःपरम्।
सागराणांपंचविंशन्महाखर्वशतंतथा।।१८।।
खर्वाणामष्टपंचाशन्यर्बुदानांत्रयोदशः अर्बुदानामष्टषष्टिःकोटीनामेकविंशतिः।।१६।।
लक्षाणांपंचचत्वारिसहस्राणांदशक्रमात्।
पश्चाच्छताष्टकमितिवाल्मीकिगणतात्स्मृतम्।।२०।।
एतत्संख्यानुसारेणसप्तसूर्येषुचक्रमात्।
एकैकस्मिन्स्वभावेनवर्तन्तेसृष्टिशक्तयः।।२१।।
अनयोरुभयशक्त्योस्सर्मेळनात्परस्परम्।
संजातोभूत्स्वभांवनशक्तिपंजरमद्भूतम्।।२२।।
पश्चात्स्मिन्क्रमाज्जगत्सृष्ट्यर्थमीश्चराज्ञया।
संजातानिषडंगानिकूर्माद्याकश्यपावणि।।२३।।
तेषांशास्त्रोक्तनामानिविलिख्यन्तेयथाक्रमम्।
कूर्मवातस्कंधशेषदिग्गजादितिकश्यपाः।।२४।।
षडैतेंगानीतिशास्त्रेपंजरस्यवदन्तिहि।
तेषुप्रकाशगर्भास्युःदिग्गजांदितिकश्यपाः।।२५।।
कूर्मवातस्कंधशेषास्तमोगर्भाइतीरिताः। पूर्वोक्तोर्ध्वकपालाकर्षणेनाथातिवेगतः।।२६।।
स्वयमूर्ध्वमुखाभूत्वातेजोगर्भास्वभावतः।
मध्यकेंद्रादूर्ध्वकेंद्रगर्भान्तव्यापिताःक्रमात्।।२७।।
एवमेवाधःकपालाकर्षणेनस्वभावतः।
अथोमुखास्स्वतोभूत्वा तमोगर्भाश्चवेगतः।।२८।।
मध्यकेन्द्रादधःकेंद्रगर्भान्तंव्यापिताःक्रमात्।
मध्यकेंद्रादूर्ध्वकेंद्रपर्यन्तपंजरेक्रमात्।।२६।।
आरोगाद्यास्सप्तसूर्यावर्तन्तेशक्तिभिस्सह।
तथैवतन्मध्यकेंद्रादधस्सीमावधिक्रमात्।।३०।।
पंचभूतानिवर्तन्तेतच्छक्तिभिस्सहस्वत।ः
अथादौजडप्रपंचस्यसृष्ट्यर्थंजगदीश्वरः।।३१।।
संगृह्यपंचभूतानिशक्तिभिस्सहितानिहि।
आकाशादिक्रमात्पंचीकृत्यपश्चात्स्वशक्तितः।।३२।।
एतत्पंचीकृतमहाभेतैस्तच्छक्तिपंजरे। अवासृजज्जडमिदंप्रपंचंसर्वतोमुख्यम्।।३३।।

।।इति।।

।।सूत्रम् ५०।।

।।सृष्टिस्सूर्यकिरणेभ्यश्चिच्चैत्यविभागेन।।

।।बोधानन्द वृत्तिः।।

पूर्वसूत्रेपंजरोत्पत्तिमुक्त्वाथयथाक्रमम्।
अस्मिन्चिच्चैत्यभेदेनजगत्सृष्टिरुदीर्यते।।१।।
पदानित्रीणीसूत्रेस्मिन्निर्णितानियथाविधि।
तत्रादिमपदात्सृष्टिर्जगतस्संप्रदर्शितः।।२।।
द्वितीयपदतस्सूर्यकिरणास्सन्निरूपिताः। सूर्योशुशक्तिप्रभेदस्तृतीयपदतस्स्मृतः।।३।।
पदार्थमेवमुक्त्वास्यसंप्रदायानुसारतः। अथेदानींसमासेनसामान्यार्थोधुनोच्यते।।४।।

।।सामान्यार्थः।।

पूर्वोक्तारोगासिूर्यकिरणेषुस्वभावतः। शक्तयस्सन्तिचिच्चैत्यप्रभेदेनद्विधाक्रमात्।।५।।
ऊर्ध्वधृवाकर्षणेनशक्तयोतास्स्वभावतः।
तिष्ठन्त्यूर्ध्वमुखास्तासुचिच्छक्तयइतीरिताः।।६।।
पूर्वधृवाकर्षणेनवर्तन्तेयास्त्वथोसुखाः। ताश्चैत्यशक्तयइतिप्रवदन्तिंमनीषिणः।।७।।
आश्रित्यपंचभूतानिवर्तन्तेचैत्यशक्तयः।
चिच्छक्तयस्तयोरात्मशक्तिमाश्रित्यकेवलम्।।८।।
वर्तन्तेसृष्टिकार्यार्थमितिशास्त्रविनिर्णयः।
याःपंचभूतान्याश्रित्यवर्तन्तेशक्तयःक्रमात्।।९।।
जडशक्तयइत्युक्ताश्शास्त्रेषुज्ञानवित्तमैः।
आत्माशक्तिंसमाश्रित्यवर्तन्तेयास्स्यभावतः।।१०।।
चैतन्यशक्तयइतिप्रवदन्तिमनीषिणः। अथसृष्टिंकर्तुकामस्स्वसंकल्पानुसारतः।।११।।
क्रमात्तत्पंचभूतानिसमाहृत्यमहेश्वरः।
सृष्टयर्थमभजद्वेधाआकाशादिक्रमात्स्वयम्।।१२।।
तयोर्भूतविभागांशान्सन्निधायपृथक्पृथक्।
अवशिष्टर्धभागांशेष्वेकैकांशमतःपरम्।।१३।।
आकाशदिक्रमेणाथचतुर्धाविभजत्पुनः। विभाजितेषुतत्पंचभूतांशेषुयथाक्रमम्।।१४।।
एकैकभागमादायसृष्ट्यर्थेजगदीश्वरः।
निक्षिप्तभूतार्धभागेष्वेकैकस्मिन्नियोजयत्।।१५।।
तेनपंचीकृतानिस्युःपंचभूतानिपंचधा। एतत्पंचीकृतमहाभूतशक्तीस्तथैवच।।१६।।
सप्तसूर्यस्थात्मचैतन्यशक्तिश्चततःपरम्।
परस्परंमेळयित्वास्वमायाशक्तितःक्रमात्।।१७।।


जडस्वरूपमखिलंजगदेतन्महत्तरम्। यथासंकल्पितंपूर्वनिर्ममेभगवान्तथा।।१८।।
अचलत्वाज्जडत्वाच्चप्रपंचस्यमनागपि। व्यवहारक्षमत्वंचचेतनत्वमपिस्वतः।।१९।।
नाभूत्तस्मात्स्वयंपश्चात्परमात्मानिरंजन।
तथाविधंजगदृष्ट्वासमालोच्यविशेषतः।।२०।।
चैतन्यत्वंव्यवहारयोग्यत्वंचक्रमेणहि। प्रदांतुजगतस्सूर्यकिरणांतर्गतांपुनः।।२१।।
स्वस्यसंस्मृत्यचिच्छक्तिंतांसमाहृत्यतेजसा।
तस्मिन्जडप्रपंचेथसंददेशीघ्रतःक्रमात्।।२२।।
तस्माज्जडप्रपंचोयंचैतन्यत्वमतःपरम्। व्यवहारक्षमत्वंचतत्क्षणादगमत्स्वतः।।२३।।
इत्यंशुबोधिनीशास्त्रस्याध्यायेप्रथमेक्रमात्।
सूर्यस्याधिष्ठानसिद्धिमात्मसंसिद्धिमेवच।।२४।।
जगत्सृष्ट्यधिकारत्वसंसिद्धिश्चाप्यथाविधि।
श्रुतिमानानुसारेणसुविचार्यविनिश्चितम्।।२५।।
इत्येतत्प्रथमाध्यायसंग्रहार्थोनिरूपितः।
तस्मात्सृष्ट्यधिकारत्वंसूर्यस्येवेतिनिर्णितम्।।२६।।
इत्यंशुबोधिनीशास्त्रेभरद्वाजकृतेक्रमात्।
समाप्तिमगमत्प्रथमाध्यायश्श्रुतिपोषितः।।२७।।

शुध्दाशुद्ध प्रत्रिका

भारद्वाजः	भरद्वाजः
कारणशक्तिभिरेव	कारणसृष्टिबीज
सांकेतक	सांकेत
पराशक्या	परशक्त्या
चर्तुग	चतुर्थ
अकल्पत्सृष्टि	अकल्पयत्सृष्टि
वृत्तः	वृत्तिः
स्वतसिद्धात्म	स्वतस्सिद्धात्म
यदात्मेति	यषाप्नोति
द्वितीम	द्विवतीय
तस्याद्वीपवत्	नस्यांद्वीपबत्
उक्षेपणेन	उत्क्षेषणेन
गर्भप्रवेशोन्तः	गर्भप्रवेशः
तिष्ठन्तितेषुध्वान्तादितिशक्तीस्संयोजयेत् क्रमात्।	
विंशति	विंशतिश्च

भ्रमणवेगा	भ्रमवेगा
ग्रवदन्ति	प्रवदन्ति
ययोक्तं	यथोक्तं
तावत्प्रमाणं	तावत्प्रमाण
रक्तसुंडालकृष्णादिगरलद्रावकेनच।	
ताद्रावकेन	तद्द्रावकेन
तद्वच्छायामुखादर्शादिमरेखांकनामुंख८१	संभ्रामयेद्यथा
विज्ञानपारदैः	विज्ञानपारगैः
तस्मांचस्वतस्सिद्धन्यायमानानुसारतः	
अजन्यत्वद्वि	अजन्यत्वाद्वि
स्थितिः	स्थितः
त्वंरजस्तमो	सत्वंरजस्तमो
तूर्वसूत्रे	पूर्वसूत्रे
अमणत्व	भ्रमण्त्व
भ्रएवं	एवं
तत्र विशेषप्रकाश विशिष्टा सर्योदयः।	
सामान्यप्रकाशविशिष्ट दर्पणादयः।	
रंजिकादावादित्यवत।	
पकाशाधिक्य	प्रकाशाधिक्य
अंशोनामंगइत्याहु	
अंशोनामेगमित्याहु	१०
तस्मात्त्युत्तर	तस्मात्त्र्युत्तर
निरंक्तयुवाच्च	निरंशत्वाच्च
न्ययमानं	न्यायमानं
पदान्थस्मि	पदान्यस्मि
तथाहिव्यप्तिः	तथाहिव्याप्तिः
गुणतश्चैव	गुणतश्चैक
रूप्योध्वान्त	रूप्योर्ध्वान्तं
स्वरूपतः	स्वरूपयोः
रेखाप्रबोधक	रेखापथप्रबोधक
चतुःक्रमात्	चत्वार्यथाविधि
स्त्रैकांश	स्त्र्यैकांश

पंचदशात्मकः	
पंचदशकोट्यात्मकः	२
ब्रह्माण्डस्यच	ब्रह्माण्डस्याथ
गर्भान्माविद्यु	गर्भान्महाविद्यु
तत्प्रत्यभासः	तत्रत्यभासः
छेदनावधि	भेदनावधि
तथैववर्तुलाकारं	यथैववर्तुलाकारं
सृष्ट्यर्थ	तन्मध्ये
ददितीरिति	ददितिरिति
शक्तिगर्भा	सृष्टिगर्भा
तद्गर्भानां	तद्गर्भाणां
तस्मिन्नैव	तस्मिन्नेव
स्वप्रकाशांशो	त्यप्रकाशांशे
शब्दोवकाशसूक्ष्म	
शब्दोवकाशस्सूक्ष्म	७
तथमाति	यथामति





Sun Temple, Gujarat

सूर्य मंदिर, गुजरात

